অপ নঃ শোশুচদঘম্॥ ৫ ॥ ত্বং হি বিশ্বতোমুখং বিশ্বতঃ পরিভূরসি অপ নঃ শোশুচদঘম্॥ ৬ ॥ দ্বিষো নো বিশ্বতো মুখাতিনাবেব পারয়ঃ অপ নঃ শোশুচদঘম্॥ ৭ ॥ স নঃ সিন্ধুমিব নাবয়াতি পর্ষা স্বস্তয়ে অপ নঃ শোশু-চদঘম্॥ ৮ ॥ ততঃ আচারাৎ সূর্য্যায়ার্ঘ্যন্দদ্যাৎ। পতিঃ পত্ন্যাঃ পৃষ্ঠদেশে তিষ্ঠন্ পত্ন্যা হস্তদ্বয়ং আত্মহস্তদ্বয়েন অঞ্জলিং বদ্ধা চতুর্হস্তেন অর্ঘ্যং গৃহীত্বা হিরণ্যস্তূপঋষিঃ সবিতা দেবতা ত্রিষ্টুপ্ছন্দোঽর্ঘ্যদানে বিনিয়োগঃ। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্যঞ্চ হিরণ্যয়েন সবিতা রথেনাদেবো যাতি ভুবনানি পশ্যন্। ইতি মন্ত্রেণ সূর্য্যং পশ্যন্ অর্ঘ্যং দদ্যাৎ প্রণমেচ্চ। ততঃ পতির্ব্বক্ষ্যমাণেন পত্ন্যৈ শরাববদ্ধানি ফলানি দদ্যাৎ। ওঁ যাঃ ফলি-নীর্যা অফলা অপুষ্পা যাশ্চ পুষ্পিণীঃ। বৃহস্পতিপ্রসূতাস্তা নো মুঞ্চন্ত্বংহসঃ। সা চ প্রসারিতাঞ্জলা সন্তুষ্টা সতী সুপুত্রাঃ সুরূপাঃ সুবর্চ্চসো মে ভবেয়ুঃ। ইত্যাসংশন্তী গৃহ্নীয়াৎ। ততঃ পতিঃ পত্নী চ উত্থায় ততঃ পতির্ভার্য্যায়া নাভিদেশে স্বর্ণাঙ্গুরীং দদ্যাৎ। ওঁ গর্ভং ধেহি সিনীবালি গর্ভং ধেহি সরস্বতি। গর্ভং তে অশ্বিনৌ দেবা বাধত্তাং পুষ্করস্রজৌ। ইত্যনেন অঙ্গুরী যথা ভূমৌ পতেৎ। ততঃ পতির্বক্ষ্যমাণসূক্তং জপেৎ। ওঁ যা তে গর্ভো যোনিমেতু পুমান্ বাণ ইবেষুধিম্। সুবীরো জায়তাং পুত্রস্তে দশমাস্যঃ করোমি তে প্রাজাপত্যমাগর্ভো যোনিমেতু তে। অনূনঃ পূর্ণো জায়তামনন্ধোঃ শ্রোণো পিশাচরিতঃ। পুমাংস্তে পুত্রো নদীতঃ পুমান্ নু জায়তাম্। তানি ভদ্রাণি বীজান্যৃষভা জনয়ন্তি নঃ। তানি ভদ্রাণি বীজা-ন্যৃষভা জনয়ন্তি নৌ। তে স্বং পুত্রান বিন্দস্ব সা প্রসূর্ধেনুকা ভব। কামঃ সমৃধ্যতাং মহ্যমপরাজিত মে বমোঽয়ং কামং

র্বিধেম বয়ং হবৈ্যঃ পাবকভদ্রশোচে। অশ্বেরয়িং বিশ্ববারং সমিন্নাস্মে বিশ্বানি দ্রবিণানি ধেহি। অস্মাকমগ্নে অধ্বরংদ্মগমূ-
সহসঃ সূনো ত্রিধয়স্থ হব্যম্। বয়ং দেবেষু সুকৃতঃ স্যামঃ শর্ম্মস্তানস্ত্রিবরূথেম পাহি। বিশ্বানিনো ইত্যৃচো মাধ্যমাত্রেয়ো
বসুশ্রুতঋষির্জাতবেদা অগ্নির্দ্দেবতা ত্রিষ্টুপ্ছন্দঃ অগ্ন্যুপস্থানে বিনিয়োগঃ। ওঁ বিশ্বানিনো দুর্গহা জাতবেদঃ সিন্ধুং ননাবা-
দুরিতাতিপর্ষি। অগ্নে অত্রিবন্নামসা গৃণানো হস্মাকং বোধ্যবিতা তনূনাম্। যস্ত্বা হৃদা কীরিণামন্যমানো মর্ত্যং মর্ত্যো যো
হবীমি। জাতবেদো যশোহস্মাসু ধেহি প্রজাভিরগ্নে অমৃতত্বমস্যাম্। যস্মৈ ত্বং সুকৃতে জাতবেদ উ লোকমগ্নে কৃণবস্যোনং
অশ্বিনং সপুত্রিণং বীরবন্তং গোমন্তং রয়িং ন শতেষস্তি। ইতি ষড়্ভিঃ। ওঁ অগ্নিস্ত বিস্রবস্ত ব্রহ্মাণমুত্তমম্। অতূর্ত্তং শ্রাবয়েৎ
পতিং পুত্রং দদাতি দাশুষে অগ্নির্দ্দদাতি সৎপতিম্। মাসাহায়ায়ুধানৃভিঃ। অগ্নিরত্যং রয়ুষ্যদং জেতারমপরাজিতম্। ইত্যষ্টভি- ২২৪
রগ্নিমুপস্থায়। ওঁ সূর্য্যো নো দিবস্পাতু রাত্রান্তরীক্ষাদগ্নির্নঃ পার্থিবেভ্যঃ। ওঁ যোষা সবিতর্য্যস্যাতি হরঃ শতং শবং অর্হতি
পাহি নো দিদ্যুতঃ পতন্ত্যা চক্ষুর্ন উত পর্ব্বতঃ। চক্ষুর্ধাতা দধাতু নঃ চক্ষুর্নো দেহি চক্ষসে চক্ষুর্ব্বিশ্বে তনুভ্যঃ সক্কেদম্।
বিপশ্যেম সূর্য্য বিপশ্যেম নৃচক্ষসঃ। ইতি পঞ্চর্চ্চেন সূর্য্যমুপতিষ্ঠেৎ। ইতি ত্বুপস্থানং সংপ্রদায়ানুরুদ্ধম্। ততঃ পত্ন্যা
মূর্দ্ধানমালভেৎ পতির্বক্ষ্যমাণমন্ত্রেণ। ওঁ অপ নঃ শোশুচদঘং অগ্নে শুশুগ্ধ্যারয়িং অপ নঃ শোশুচদঘম্॥ ১ ॥ সুক্ষেত্রিয়া
সুগাতু যা বসূয়া চ যজামহে অপ নঃ শোশুচদঘম্॥ ২ ॥ প্রযন্তুং দিষ্ট এষাং প্রাস্মাকাশশ্চ সূরয়ঃ অপ নঃ শোশুচদ-
ঘম্॥ ৩ ॥ প্রযত্তেহগ্নে সূরয়ো জায়েমহি প্রতেবয়ং অপ নঃ শোশুচদঘম্॥ ৪ ॥ প্রযদগ্নে সহস্বাতা বিশ্বতো যান্তি ভানবঃ

কাময়েদেব তস্মৈ বায়ো সমর্দ্ধয়। ইতি সূক্তম্। ততশ্চরুতঃ কিঞ্চিদাদায় স্বিষ্টকৃদ্ধোমং সমাপ্য আজ্যেন প্রায়শ্চিত্তানি হোমং পূর্ণাহুত্যন্তং সমাপ্য ওঁ অদ্যেত্যাদি গর্ভাধানকর্ম্মণি কৃতাকৃতাবেক্ষণায় ব্রহ্মণে পূর্ণপাত্রমিদং প্রজাপতিদৈবতং দক্ষিণাং দাতুমহমুৎসৃজে। অন্যং সর্ব্বং সমম্। অথ ভর্ত্তা অশ্বগন্ধায়া মূলং মঘামূলাদিবর্জিতে নক্ষত্রে উৎপাট্য রজোদর্শনাদৃতুস্নানা-দপরেঽহনি ঋতুস্নাতাং সুগন্ধমাল্যাদিভিরলঙ্কৃতাং স্বয়ঞ্চ তদ্বদলঙ্কৃতঃ গৃহঞ্চ পুষ্পমাল্যাদিভিরলঙ্কৃত্য রাত্রৌ নবশুভ্রবস্ত্রশয্যায়া-স্তীর্য্য তন্মূলং জলেন পেষয়িত্বা নবশুক্লবস্ত্রেণ নিষ্পীড্য ঋতুমত্যা দক্ষিণনাসারন্ধ্রে ওঁ উদীর্ষ্বাতঃ পতিবতী হ্যেষা বিশ্বাবসুং মনসা গীর্ভির্ব্বীণে। অন্যামিচ্ছ পিতৃষদং ব্যক্তাং স তে ভাগো জনুষা তস্য বিদ্ধি। ওঁ উদীর্ষ্বাতো বিশ্বাবসুর্নমসে নাম হেত্বা। অন্যামিচ্ছ প্রভব্যাং সঞ্জায়াং পত্ন্যা সৃজ স্বাহা। ইত্যেতাভ্যাং সক্রন্নস্যং দদ্যাৎ। ওঁ গন্ধর্ব্বস্য বিশ্বাবসোর্ম্মুখমসীতি জপ্ত্বা দক্ষিণপাণিনা উপস্থং স্পৃশেৎ। ওঁ বিষ্ণুর্যোনিং কল্পয়তু ত্বষ্টা রূপাণি পিংষতু। আসিঞ্চতু প্রজাপতির্ধাতা গর্ভং দধাতু তে। ইতি যোনিং বিদারয়েৎ। ওঁ তাং পূষং শিবতমা মে রমস্ব যস্যাং বীজং মনুষ্যা বপন্তি। যা ন উশতী বিশ্বায়া তে যস্যা-মুপস্তং প্রতরাম শেফম্। ইতি পঠিত্বা উপগচ্ছেৎ। যস্যামিত্যমুক্যামিত্যূহম্। রেতঃপাতাবসরে ওঁ প্রাণে তে রেতো দধামি অসাবিতি পত্নীনাম সম্বোধনম্। সমাপ্তে রতে তামনুপ্রীণয়েৎ। ওঁ যথা ভূমিরগ্নিগর্ভা যথা দ্যৌরিন্দ্রেণ গর্ভিণী। বায়ুর্যথা দিশাং গর্ভমেবং গর্ভং দধামি তে। অসাবিতি পতির্জ্জপেৎ। অসাবিতি অমুকীতি সম্বোধনম্ ॥ * ॥ * ॥ ২২৫

অথ পুংসবনম্ ॥ * ॥ গর্ভাধানমাসাৎ তৃতীয়ে গর্ভমাসে তত্রাজ্ঞানে চতুর্থ গর্ভমাসে বা তিষ্য নক্ষত্রে পুংসবনং কার্য্যম্। পুংসবনপূর্ব্বেদ্যুর্গর্ভিণী সকৃদ্ভুঞ্জীতাক্ষারলবণবর্জ্জম্। পুংসবন দিনে কর্ত্তা কৃতাভ্যুদয়িকঃ গোময়েনোপলিপ্তাঙ্গনে উপবিশ্য নির্ম্মঞ্ছনাদি মঙ্গলপূর্ব্বক কৃতস্নানাং গর্ভিণীং সমীপমাস্থায় ওঁ স্বস্তি নো মিমীতেতি স্বস্তিসূক্তং পঠিত্বা সজলং কুশপত্রত্রয়মাদায় ওঁ অদ্যেত্যাদি কর্ত্তব্য পুংসবনাখ্য কর্ম্মাঙ্গমন্বাধানং দেবতাপরিগ্রহার্থং প্রজাপতিং সমিদ্ভ্যাং অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং চাঘারদেবতে আজ্যেনাগ্নীসোমৌ চক্ষুষী আজ্যেন প্রজাপতিং প্রধানদেবতাশ্চরুদ্রব্যেণ অগ্নিং স্বিষ্টকৃতং হবির্দ্রব্যেণ ইধ্মসন্নহনেন রুদ্রং বিশ্বান্ দেবান্ সংস্রাবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং বিষ্ণুং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষে। ইতি সংকল্প্য চান্দ্রমসনামানমগ্নিং সংস্থাপ্য ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইত্যাজ্যান্তে সীমধাবগ্নাবাধায় পরিসমূহনাদি আজ্যভাগান্তং কর্ম্ম কৃত্বা ওঁ অগ্নে ত্বং চান্দ্রমসনামাসীতি নাম কৃত্বা পাদ্যাদিভিঃ সংপূজ্য দধিমাষযবদূর্ব্বাণামাসাদনমধিকমিতি বিশেষঃ। সমানবর্ণবৎসায়াস্তদভাবে অন্য বর্ণায়া অপি গোর্দ্দধি গর্ভিণ্যাঃ স্ত্রিয়া দক্ষিণপ্রসৃতৌ নিধায় তত্রাণ্ডাকারং মাষদ্বয়ং যবঞ্চ শিশ্নরূপং প্রক্ষিপ্য কিং পিবসীতি গর্ভিণীং ত্রিঃ পৃচ্ছেৎ পতিঃ। পুংসবনমিতি ত্রিরুক্ত্বা মন্ত্রাবৃত্ত্যা সা প্রসৃতিত্রয়ং পিবেৎ। ততঃ আচামেৎ ॥ * ॥

অথানবলোভনম্। কর্ত্তা মণ্ডলাগারচ্ছায়ায়ামুপবিশ্য গর্ভিণীদক্ষিণনাসাপুটে আসাদিতদূর্ব্বারসং শিশিরপিষ্টং নবশুভ্রবস্ত্রশোধিতং তুষ্ণীং নিষিঞ্চেৎ পতিঃ। ততঃ পত্নীমুত্থাপ্য স্বয়ঞ্চোত্থায় পূর্ব্ববচ্চরুং গৃহীত্বা ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে

নমঃ। ইত্যেকামাহুতিং জুহোতি। ততঃ পতির্ব্বস্ত্রতিরোহিতং হৃদয়দেশমস্যা দক্ষিণপাণিনা স্পৃশেৎ বক্ষ্যমাণমন্ত্রেণ ওঁ যত্তে সুসীমে হৃদয়ং হিতমন্তঃ প্রজাপতৌ। মন্যেঽহং মাং তদ্বিদ্বাংসং মাহং পৌত্রমঘন্নিয়াম্। উপবিশ্য চরুণা স্বিষ্টকৃতং সমাপ্য আজ্যেন প্রায়শ্চিত্তহোমাদিপূর্ণাহুত্যন্তং কৃত্বা হোমদক্ষিণাং কুর্য্যাৎ। অন্যৎ সর্ব্বং সমম্। অত্র পতির্দ্দেবরো বা কর্ত্তা। তথা চ কারিকাবচনম্। কর্ত্তা স্যাদ্দেবরস্ত্বস্য তস্যাঃ পত্যুরসম্ভবে ॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বলায়নপদ্ধতৌ পুংসবনানবলোভন প্রয়োগঃ ॥ * ॥

অথ সীমন্তোন্নয়নম্ ॥ * ॥ চতুর্থ গর্ভ মাসে তত্রাশক্তৌ ষষ্ঠে তত্রাপ্যশক্তৌ অষ্টমে। শুক্লপক্ষে পুংনক্ষত্রে। পুংনক্ষত্রাণি চৈতানি তিষ্যো হস্তঃ পুনর্ব্বসুঃ। অভিজিৎপ্রোষ্ঠপাচ্চৈব অনুরাধা তথাশ্বযুক্। রবিগুরুভৌমবাসরে সীমন্তোন্নয়নম্। তত্র ২২৭
নির্ব্বর্ত্তিত নিত্যকৃত্যঃ কৃতাভ্যুদয়িকঃ আসনে উপবিশ্য প্রাণানায়ম্য উপলেপনাদ্যগ্নিপ্রতিষ্ঠাপনান্তং কর্ম্ম কৃত্বা সজলকুশপত্রত্রয়মাদায় ওঁ অদ্যেত্যাদি কর্ত্তব্য স্ত্রীসংস্কারদ্বারা গর্ভসংস্কারক সীমন্তোন্নয়নাখ্য কর্ম্ম তদঙ্গমন্বাধানঞ্চ দেবতাপরিগ্রহার্থং প্রজাপতিং সমিদ্ভ্যাং অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং প্রজাপতিঞ্চাঘারদেবতে আজ্যেনাগ্নীষোমৌ চক্ষুষী আজ্যেন ধাতা রাকাবিষ্ণুপ্রধান দেবতা আজ্যদ্রব্যেণ হবিঃশেষেণ স্বিষ্টকৃতমিধ্মসন্নহনেন রুদ্রং বিশ্বান্ দেবান্ সংস্রাবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুমগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষে। ইতি সঙ্কল্প্য মঙ্গলনামানমগ্নিং সংস্থাপ্য দ্বে সমিধৌ পূর্ব্ববদাধায় প্রাক্গ্রীবমূর্দ্ধলোমানডুহং চর্ম্ম প্রোক্ষণীং চমসং স্রুবং আজ্য

পাত্রং ইধ্মবর্হির্নুক্রমেণাসাদ্য ততঃ পবিত্রকরণাদি আজ্যস্য বর্হিষি আসাদনং কৃত্বা অগ্নেঃ প্রত্যগাসাদিত প্রাচীনগ্রীবানডুহ-
চর্ম্মণি উপবিষ্টয়া পত্ন্যা সংস্পৃষ্টঃ পতিরিধ্মাধানাদ্যাঘারাজ্যভাগান্তং কৃত্বা মঙ্গলনামানমগ্নিং সংপূজ্য অষ্টাজ্যাহুতীর্জুহুয়াৎ। ধাতা
দধাতু দাশুষে ইতি দ্বাভ্যাং হিরণ্যগর্ভঋষিঃ সবিতা দেবতা অনুষ্টুপ্‌ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ ধাতা দধাতু দাশুষে
প্রাচীং জীবাতু মক্ষিকাম্। বয়ং দেবস্য ধীমহি সুমতির্ব্বা জিনীবত স্বাহা। ইদং ধাত্রে নমঃ॥ ১ ॥ ওঁ ধাতা প্রজানা সূতং বা
য ঈশে ধাতেদং বিশ্বং ভুবনং জজান। ধাতা কৃষ্টীবনিমিষাতিচষ্টে ধাত্র ইন্ধব্যং ঘৃতবর্জ্জুহোতু স্বাহা। ইদং ধাত্রে নমঃ॥ ২ ॥
রাকামহমিতি দ্বাভ্যাং গৃৎসমদঋষী রাকা দেবতা জগতীচ্ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ রাকামহং সুত বা সুষ্টুতী হুবে
শৃণোতু নঃ সুভগা বোধতুত্মনা। সীব্যত্বয়ঃ সূচ্যা ছিদ্যমানয়া দদাতু বীরং শতদায়মুক্‌থ্যং স্বাহা। ইদং রাকায়ৈ ॥ ৩ ॥ ওঁ যাস্তে
রাকে সুমতয়ঃ সুপেশসো যাভির্দ্দদাসি দাশুষে বসূনি। তাভির্নো হদ্য সুমনা উগিহি সহস্রপোষং সুভগে বরাণা স্বাহা। ইদং
রাকায়ৈ নমঃ॥ ৪ ॥ নেজমেষেতি তিসৃণাং হিরণ্যগর্ভঋষির্ব্বিষ্ণুর্দ্দেবতা অনুষ্টুপ্‌ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ নেজমেষ
পরাবত সুপুত্রঃ পুনরাপত। অস্যৈ মে পুত্রকামায়ৈ গর্ভমাধেহি যঃ পুমান্ স্বাহা। ইদং বিষ্ণবে নমঃ॥ ৫ ॥ ওঁ যথেয়ং পৃথিবীমহ্য-
ত্তানা গর্ভমাদধে। এবং ত্বং গর্ভমাধেহি দশমে মাসি সূতবে স্বাহা। ইদং বিষ্ণবে নমঃ॥ ৬ ॥ ওঁ বিষ্ণো শ্রেষ্ঠেন রূপেণাস্যাং নার্য্যাং
গর্ভিণ্যাম্। পুমাংসং পুত্রমাধেহি দশমে মাসি সূতবে স্বাহা। ইদং বিষ্ণবে নমঃ॥ ৭ ॥ প্রজাপতয়ে নত্বদিত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপ-
তির্দ্দেবতা ত্রিষ্টুপ্‌ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে নত্বদেতান্যন্যো বিশ্বা জাতানি পরিতা বভূব। যৎকামাস্তেজহুমস্তন্নোহস্তু

বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ইদং প্রজাপতয়ে নমঃ ॥ ৮ ॥ ততঃ আসাদিতাপক্বফলোডুম্বরশাখাদ্বয়ং স্তবকং বা তদভাবে শুক্ল-শল্কীত্রয়ং সাগ্রপ্রাদেশপ্রমাণান্তর্গর্ভি সাগ্রং সূত্রবেষ্টিতকুশপত্রদ্বয়ং পিঞ্জলী এতত্ত্রিকমৈকীকৃত্যাদায় কেশললাটসন্ধিমারভ্য পৃষ্ঠভাবে মূর্দ্ধানং যাবৎ ত্রিশ্চতুর্ব্বা ভূর্ভুবঃ স্বরোঁ ইতি মন্ত্রাবৃত্ত্যা ঊর্দ্ধং যথা স্যাত্তথা সীমন্তং বৃহতি। ততঃ পতির্বীণাগায়িনৌ সংশাস্তি ভবন্তৌ সোমং রাজনং গায়েতামিতি। ওঁ সোমে নো রাজা অবতু মানুষীপ্রজ অদিবিষ্টচক্রাসাবিতি তৌ সাঙ্গায়েতাম্। অসাবিতি গ্রামসমীপনদীসম্বোধনং। সধবপ্রজা বৃদ্ধা ব্রাহ্মণী যদুপদিশৎ তদাবির্ভিণী কুর্য্যাৎ। ততঃ স্বিষ্টকৃদ্ধোমং সমাপ্য প্রায়শ্চিত্তাদি হোমং পূর্ণাহুত্যন্তং সমাপয়েৎ। কর্ম্মণ্যস্মিন্ রুদ্রো দেবতা বৃষভো দক্ষিণা অন্যৎ সর্ব্বং সমম্ ॥ * ॥ * ॥

॥ * ॥ ইতি শ্রীবাসুদেবভট্ট বিরচিতাশ্বলায়নপদ্ধতৌ সীমন্তোন্নয়নপ্রয়োগঃ ॥ * ॥ 

অথ জাতকর্ম্ম ॥ * ॥ তত্র পুত্রে জাতেঽন্যৈরসংস্পৃষ্টে পিতা মঙ্গলপূর্ব্বকং পুত্রমুখং দৃষ্ট্বা সচেলঃ স্নাত্বা কর্ম্মস্থানমাগত্য সজলকুশপত্রত্রয়মাদায় ওঁ অদ্যেত্যাদি কর্ত্তব্য কুমারসংস্কারজাতকর্ম্মনিমিত্তকমাভ্যুদয়িকং করিষ্যে ইতি সঙ্কল্প্যাভ্যুদয়িকং কুর্য্যাৎ। হোমকরণপক্ষে উপলেপনাদ্যগ্নিপ্রতিষ্ঠাপনান্তং কৃত্বা কর্ত্তব্য কুমারসংস্কারক জাতকর্ম্মাঙ্গং অন্বাধানমহং করিষ্যে। ইতি সঙ্কল্প্য প্রগলভ-নামানমগ্নিং সংস্থাপ্য দ্বে সমিধাবগ্নাবাধায় প্রগলভনামানমগ্নিং সংপূজ্য অগ্নীন্দ্রপ্রজাপতিবিশ্বদেবব্রহ্মণশ্চতুর্থ্যন্ত পদোপনীতানুল্লিখ্য স্বাহাকারেণ পঞ্চাজ্যাহুতীর্হুত্বা প্রাণানায়ম্য ওঁ অদ্যেত্যাদি কুমারসংস্কারার্থং জাতকর্ম্ম করিষ্যে ইতি সংকল্প্য একস্মিন্ পাষাণভাজনে সর্পির্ম্মধুনী সমানীয় হিরণ্যেন উল্বমসংস্পর্শপর্য্যন্তমবল্বয্য হিরণ্যকণাসংস্পৃষ্টে সর্পির্ম্মধুনী হিরণ্যনৈব কুমারং প্রাশয়েৎ। ওঁ প্র তে

দদামি মধুনো ঘৃতস্য বেদং সবিত্রা প্রসূতং মঘোনাম্। আয়ুষ্মান্ গুপ্তো দেবতাভিঃ শতং জীব শরদো লোকেঽস্মিন্। ইতি মন্ত্রেণ।
ততঃ কুমারস্য দক্ষিণকর্ণসমীপে মুখং নিধায় হিরণ্যং কুমারস্য দক্ষিণকর্ণে নিধায় ওঁ মেধাং তে দেবঃ সবিতা মেধাং দেবী সরস্বতী।
মেধাং তে অশ্বিনৌ দেবা বাধত্তাং পুষ্করস্রজৌ। ইতি জপেৎ। এবং সব্যকর্ণেঽপি। ততঃ কুমারাংশাবভিমৃশেৎ। ওঁ অশ্মা ভব
পরশুর্ভব হিরণ্যমশ্রুতং ভব। বেদো বৈ পুত্রনামাসি স জীব শরদঃ শতম্। ইতি যুগপৎ ক্রমেণ বা সমভিমৃশ্য হিরণ্যোদকেন
দক্ষিণং স্তনং প্রক্ষাল্য কুমারং পায়য়তি। ওঁ ইমাং কুমারো জরাং ধয়তু দীর্ঘমায়ুঃ প্রজীবসে। অস্মৈ স্তনৌ প্রযুঞ্জানা আয়ুর্বর্চ্চো
যশোবলম্। হিরণ্যেনৈব বামস্তনং প্রক্ষাল্য কুমারং পায়য়তি। ইন্দ্রশ্রেষ্ঠানীতি গৃৎসমদঋষিরিন্দ্রো দেবতা ত্রিষ্টুপ্ ছন্দঃ কুমার-
স্তনপায়নে বিনিয়োগঃ। ওঁ ইন্দ্রং শ্রেষ্ঠানি দ্রবিণানি ধেহি, চিত্তং দক্ষস্য সুভগত্বমস্মে পোষং রয়ীণামরিষ্টিং তনূনাং স্বাত্মানাং বাচঃ ২৩।
সদিনত্বমহ্নাম্। ওঁ অস্মৈ প্রযন্ধি মঘবন্নৃজীষিন্নিন্দ্র রায়ো বিশ্বরারস্য ভূরেঃ। অস্মৈ শতং শরদো জীবসেনা অস্মৈ বীরান্ শশ্বত
ইন্দ্রশিপ্রীন। ইতি মন্ত্রাভ্যাং। ততঃ স্বিষ্টকৃদ্ধোমং সমাপ্য প্রায়শ্চিত্তাদি পূর্ণাহুত্যন্তং হোমশেষং সমাপ্য কর্ম্মোহেন দক্ষিণা হিরণ্যং।
অন্যৎ সর্ব্বং সমং ॥ * ॥ * ॥ * ॥ * ॥

অথ নামকরণম্ ॥ * ॥ নামত্বেকাদশে দিবসে দ্বাদশে বা শতরাত্রে সংবৎসরে বা যথোপপত্যা একে ইতি গৃহ্য-কারিকা। গৃহ্যপরিশিষ্টোক্ত কালে কৃতাভ্যুদয়িকঃ কর্ত্তা কর্ম্মস্থানমাগত্য সজলকুশপত্রত্রয়মাদায় ওঁ অদ্যেত্যাদি পুত্রসংস্কারক নামকরণাখ্য কর্ম্মাহং করিষ্যে। ইতি সংকল্প্য উপলেপনাদীধ্মানান্তং কর্ম্ম কুর্য্যাৎ। স্বস্ত্যস্মৈ বিষ্ণুমিত্রায় ভবত স্বস্ত্যস্ত্বিতি ব্রাহ্মণা ব্রূয়ুঃ। অনন্তরং স্নাতা মাতা শুচিবাসসী পরিধায় চ কুমারং কৃতস্নানং কৃতমঙ্গলং নূতন গোরোচনাদূর্ব্বাঙ্কতশিরসমঙ্কে কৃত্বা প্রাঙ্মুখী দর্ভেষূপবিশতি। ততঃ কর্ত্তা তাম্রাদিপাত্রস্থ জলেন বক্ষ্যমাণমন্ত্রেণ কুমারমভিষিঞ্চতি। ওঁ আপোহিষ্ঠেতি ওঁ দেবস্য ত্বা সবিতুঃ প্রসবেঽশ্বিনোর্ব্বাহুভ্যাং পূষ্ণো হস্তাভ্যাম্। ওঁ সমুদ্রজ্যেষ্ঠেতি। ওঁ অপ নঃ শোশুচদঘমিতি। পার্থিবনামা-নমগ্নিং সংপূজ্য তথা পঞ্চাহুতীর্জুহোতি। ওঁ অগ্নয়ে স্বাহা। ওঁ ইন্দ্রায় স্বাহা। ওঁ প্রজাপতয়ে স্বাহা। ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা। ওঁ ব্রহ্মণে স্বাহা। ততো মাতা উত্তরশিরসং কুমারং নামকর্ত্তুঃ ক্রোড়ে দদ্যাৎ। স চ পদ্ধতিপ্রক্ষেপপূর্ব্বকং কুমারকর্ণে নাম বদেৎ। শ্রী অমুকদেবশর্ম্মা নামাসি ইতি তন্মাত্রে চ কথয়েৎ অন্যেভ্যোঽপি। তদাহ সূত্রম্। ঘোষবদাদ্যমন্ত-বস্থামধ্যং বিসর্জ্জনীয়ান্তং দ্ব্যক্ষরং প্রতিষ্ঠাকামঃ। চতুরক্ষরং ব্রহ্মবর্চসকামঃ, যথা ভবো নারায়ণঃ। স্ত্রীণাং ত্র্যক্ষরং অযুগ্মম্। যথা যশোদেত্যাদি। পুংসাং যুগ্মম্। ততঃ স্বিষ্টকৃদ্ধোমং সমাপ্য প্রায়শ্চিত্তাদি হোমশেষং পূর্ণাহুত্যন্তং সমাপয়েৎ। কর্ম্মোহেন দক্ষিণা বাসসী। ততো গুপ্তনামকরণম্। ইদঞ্চ পিতরাবেব জানীয়াতাম্। উপনীতস্য ত্বাচক্ষ্যতে অনেন নাম্না এনমভিবাদয়-স্বেতি। অন্যং সর্ব্বং সমম্। ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বলায়নপদ্ধতৌ নামকরণ প্রয়োগঃ ॥ * ॥

অথ প্রোষিতপিত্রাগতকর্ম্ম ॥ * ॥ তত্র বৃদ্ধিশ্রাদ্ধং নাস্তি। ন শোষ্যন্তী জাতকর্ম্ম প্রোষিতাগমকর্ম্মসু। ইতি ছন্দোগপরিশিষ্টবচনাৎ। যদি দেশান্তরগতঃ পিতা শৃণোতি পুত্রো মে জাতস্তদাগতঃ সূতকান্তে স্নাত্বা শুচির্ভূত্বা নির্বর্ত্তিতনিত্যকৃত্যো গৃহদ্বারি স্থিত্বা ওঁ গৃহানং প্রয়াত্যেকং রম্নো বীরবতঃ সুবীরান্। ঈশং বহতো ঘৃতং রক্ষামাণাস্তেষ্বহং সুমনাঃ সংবিশামি। ইতি পঠিত্বা গৃহং প্রবেশিন্ শিবং শথং শংযোরিতি ত্রিরুক্ত্বা গৃহং নিরীক্ষ্য পুত্রস্য শিরঃ সর্বতো গৃহীত্বা মূর্দ্ধানং ত্রিরাজিঘ্রতি মন্ত্রাবৃত্ত্যা। ওঁ অঙ্গাদঙ্গাৎ সম্ভবসি হৃদয়াদধিজায়তে। আত্মা বৈ পুত্রনামাসি স জীব শরদঃ শতম্। এতৎ কর্ম্ম মাসান্তরগতেঽপি পিত্রা কর্ত্তব্যমিতি ॥ ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বলায়নপদ্ধতৌ প্রোষিতাগত প্রয়োগঃ ॥ * ॥ * ॥

অথ নিষ্ক্রমণম্ ॥ * ॥ শুভলগ্ন তিথিবার নক্ষত্রেষু শুক্লপক্ষে কর্ত্তব্যং অসম্ভবে কৃষ্ণপক্ষেঽপি। ততঃ পিতা নির্বর্ত্তিতনিত্যকৃত্যো বিষ্ণুধর্ম্মোত্তরোক্ত দেবতাপূজাং কুর্য্যাৎ। ওঁ দিগীশেভ্যো নমঃ। ওঁ দিগ্ভ্যো নমঃ। ওঁ চন্দ্রায় নমঃ। ওঁ অর্কায় নমঃ। ওঁ বাসুদেবায় নমঃ। ওঁ গগনায় নমঃ। তথা চ বিষ্ণুধর্ম্মোত্তরে। দিগীশানাং দিশাং তত্র তথা চন্দ্রার্কয়োর্দ্বিজ। পূজনং বাসুদেবস্য গগনস্য চ কারয়েৎ। ততো মাতৃপূজাপূর্ব্বকং বৃদ্ধিশ্রাদ্ধং কুর্য্যাৎ। ততো লগ্নসময়ে স্নাতা মাতা নূতন বস্ত্রাচ্ছাদিতমুত্তরশিরসং অঙ্কে কৃত্বা প্রাঙ্মুখোপবিষ্টস্য পত্যুর্দক্ষিণপার্শ্বে স্থিত্বা তদঙ্কে কুমারং দদ্যাৎ। পিতা চৈনং মন্ত্রং পঠন্ গৃহ্ণাতি। ওঁ স্বস্তি নো মিমীতামশ্বিনা ভগঃ স্বস্তি দেব্যদিতেরনর্বণঃ। স্বস্তি পূষা অসুরো দধাতু নঃ স্বস্তি দ্যাবাপৃথিবী সুচেতুনা। ইতি কুমারমঙ্কে সমারোপ্যাপ্রতিরথং জপেৎ। ওঁ অশুঃ শিশানো বৃষভো ন ভীমো ঘনাঘনঃ ক্ষোভনশ্চর্ষণীনাম। সংক্রন্দনোঽনি-

মিব একবীরঃ শতং সেনা অজয়ৎ সাকমিন্দ্রঃ। সংক্রন্দনেনানিমেষেণ জিষ্ণুনা যৎ কারেণ দুশ্চ্যবনেন ধৃষ্ণুনা। তদিন্দ্রেণ জয়ত তৎ সহধ্বং যুধোনর ইষুহস্তেন বৃষ্ণা। ইত্যাদি সূক্তং জপেৎ। ততো বিষ্ণুধর্ম্মোত্তরোক্ত মন্ত্রং পঠেৎ। চন্দ্রার্কয়োর্দ্দিগীশানাং দিশাং চ গগনস্থ চ। নিক্ষেপার্থমিদং দদ্মি তে মে রক্ষন্তু সর্ব্বদা। অথ মত্তং প্রমত্তং বা দিবারাত্রমথাপি বা। রক্ষন্তু সর্ব্বতঃ সর্ব্বে দেবাঃ শক্রপুরোগমাঃ। ততঃ পিতা বস্ত্রপিহিতমুখং কুমারং গৃহান্নিষ্ক্রাময়তি। নিষ্ক্রম্য পূর্ব্বাভিমুখঃ কুমারমুখাৎ বস্ত্রমপসার্য্য বক্ষ্যমাণমন্ত্রেণ কুমারমাদিত্যমীক্ষয়েৎ। ওঁ তচ্চক্ষুর্দ্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ। পশ্যেমঃ শরদঃ শতং জীবেমঃ শরদঃ শতম্। নন্দামঃ শরদঃ শতং ভবামঃ শরদঃ শতং শৃণুয়ামঃ শতম্। প্রব্রবামঃ শরদঃ শতং ইতি। ততো লোহিতপুষ্পতিল কুশযুতং তাম্রপাত্রং গৃহীত্বা সূর্য্যায়ার্ঘ্যং দদ্যাৎ। ওঁ আকৃষ্ণেন রজসা বর্ত্তমানো নিবেশয়ন্নমৃতং মর্ত্ত্যঞ্চ। হিরণ্যয়েন সবিতা রথেনাদেবো যাতি ভুবনানি পশ্যন্। ততঃ কুমারং মাত্রে সমর্পয়েদিতি। মাতা পতিপুত্রবতীভিঃ স্ত্রীভির্ব্বৃতা মঙ্গলতূর্য্য-ঘোষৈঃ কুমারং বন্ধুস্বজনানাং গৃহং নীত্বা স্বগৃহমানয়েৎ। ততঃ সায়ম্ ক্ষীরোদার্ণবসম্ভূত অত্রিনেত্রসমুদ্ভব। গৃহাণার্ঘ্যং ময়া দত্তং রোহিণ্যা সহিতো মম। ইত্যনেন চন্দ্রায়ার্ঘ্যং দদ্যাৎ ॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বলাশয়নপদ্ধতৌ নিষ্ক্রমণ প্রয়োগঃ ॥ * ॥

অথান্নপ্রাশনম্ ॥ * ॥ ষষ্ঠে মাস্যন্নপ্রাশনযাজনমন্নাদ্যকামঃ। তৈত্তিরং ব্রহ্মবর্চ্চসকামঃ। ঘৃতৌদনম্ তেজস্কামঃ। দধ্যোদনমিন্দ্রিয়কামঃ। ক্ষীরৌদনং পশুকামঃ। মধ্বোদনমায়ুষ্কামঃ। দধিমধুক্ষীরমিশ্রমন্নং প্রাশয়েৎ। সর্ব্বকামো ভবতি ইতি গৃহ-

সূত্রম্। তত্র জ্যোতিঃশাস্ত্রোক্ত শুদ্ধিদিবসে পিতা প্রাতর্নির্ব্বর্ত্তিতনিত্যকৃত্যো বিষ্ণুধর্ম্মোত্তরোক্ত দেবতাঃ পূজয়েত্তদ্যথা। ওঁ ব্রহ্মণে নমঃ। ওঁ বিষ্ণবে নমঃ। ওঁ শঙ্করায় নমঃ। ওঁ চন্দ্রায় নমঃ। ওঁ দিক্পালেভ্যো নমঃ। ওঁ পৃথিব্যৈ নমঃ। ওঁ দিগ্‌ভ্যো নমঃ। ইতি সংপূজ্য মাতৃপূজাপূর্ব্বকং শ্রাদ্ধং কুর্য্যাৎ। ততঃ উপলেপনাদ্যাজ্যভাগান্তং কর্ম্ম কৃত্বা চরুং প্রসাধ্যাবতার্য্য ইধ্মা-ধানং কুর্য্যাৎ। ততো লগ্নসময়ে স্নাতা মাতা কুমারং সুবর্ণাদিভিরলঙ্কৃতং। পরিহিতনূতনবস্ত্রমঙ্কে কৃত্বা প্রাঙ্মুখ উপবিশতি। ততঃ পিতা পঞ্চাহুতীর্জুহোতি। শুচিনামানমগ্নিং সংপূজ্য ওঁ অগ্নয়ে স্বাহা। ওঁ ইন্দ্রায় স্বাহা। ওঁ প্রজাপতয়ে স্বাহা। ওঁ বিশ্বেভ্যো দেবেভ্যঃ স্বাহা। ওঁ ব্রহ্মণে স্বাহা। ইতি হুত্বা স্বিষ্টকৃতং সমাপ্য প্রায়শ্চিত্তং সমাপয়েৎ। ততো মৎস্যমাংস-যুক্তঃ পায়সমধুশর্করান্বিতং ঘৃতমিশ্রমন্নং কাংস্যপাত্রে কৃত্বা কুমারমাচম্য মঙ্গলপূর্ব্বকমিদং মন্ত্রং পঠন্ কুমারমুখে দদ্যাৎ। ওঁ অন্ন-পতে অন্নস্য নো ধেহ্যনমীরস্য শুষ্মিণঃ। প্রদাতারং তার্য্য উর্জ্জং বো ধেহি দ্বিপদেশং চতুষ্পদে। ইতি মাতাপি সর্ব্বমন্নব্য-ঞ্জনাদিকং কিঞ্চিদুদ্ধৃত্য কুমারং প্রাশয়েৎ। ততঃ কুমারমাচাম্য পিষ্টং তাম্বুলং দত্ত্বা দেবতাগ্রভুমৌ ন্যস্য লক্ষণং পশ্যেৎ। যদাহ শঙ্খঃ। বিষ্ণুধর্ম্মোত্তরেঽপি। কৃতপানমথোৎসঙ্গদ্ধাত্রী বালং ততস্ত্যজেৎ। দেবতাগ্রতোঽথ বিন্যস্য শিল্পভাণ্ডানি সর্ব্বশঃ। শস্ত্রাণি চৈব শাস্ত্রাণি ততঃ পশ্যতু লক্ষণম্। প্রথমং যৎ স্পৃশেদ্বালঃ শিল্পভাণ্ডং স্বয়ং তদা। জীবিকা তস্য বালস্য তেনৈবাত্র ভবিষ্যতি। তুষ্ণীমেব কুমার্য্যা ইতি॥ * ॥ * ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বলায়নপদ্ধতৌ অন্নপ্রাশন প্রয়োগঃ ॥ * ॥

অথ চূড়াকরণম্ ॥ * ॥ তৃতীয়বর্ষে চৌলং উপনীত্যা সহ বা কুর্য্যাৎ। স্বকুলানুসারেণ বর্ষাভ্যন্তরে বা উদগয়নে শুক্লপক্ষে শুভেঽহনি চৌলং কুর্য্যাৎ। স্বয়মশক্তৌ বৃতো ব্রাহ্মণঃ। কর্ম্মদিন পূর্ব্বাহ্নে তিলজলকুশপত্রত্রয়মাদায়। ওঁ অদ্যেত্যাদি কর্ত্তব্য কুমারসংস্কারক চৌলকর্ম্মাঙ্গ নান্দীমুখশ্রাদ্ধমহং করিষ্যে। ইতি সঙ্কল্প্য কৃতাভ্যুদয়িকঃ কর্ত্তা কর্ম্মস্থানমাগত্য উপবিশ্য উপলেপনাদ্যগ্নি প্রতিষ্ঠাপনান্তং কৃত্বা সত্যনামানমগ্নিং সংস্থাপ্য প্রাণানাযম্য কুমারসংস্কারার্থং চৌলাখ্য কর্ম্ম তদঙ্গমন্বাধানং দেবতাপরিগ্রহার্থং চ করিষ্যে। ইতি সঙ্কল্প্য ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইত্যগ্নৌ দ্বে সমিধৌ ঘৃতাক্তে আধায় অস্মিন্নন্বাহিতে অগ্নৌ অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং প্রজাপতিঞ্চাঘারদেবতে আজ্যেনাগ্নিং পবমানং প্রজাপতিঞ্চ প্রধানদেবতা আজ্যশেষেণ স্বিষ্ট কৃতমিধ্মসন্নহনেন রুদ্রং বিশ্বান্ দেবান্ সংস্রাবেণ সর্ব্বপ্রায়শ্চিত্ত দেবতা অগ্নিং দেবান্ বিষ্ণুং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষ্যে। ইতি সঙ্কল্প্য প্রোক্ষণীং স্রুবমাসাদ্য চমসঞ্চাজ্যভাজনম্। ইধ্মাবর্হিরয়ং প্রোক্ত আজ্যহোমে ত্বয়ং বিধিঃ। ইতি পাত্রাসাদনম্। ব্রীহিমাষযবতিলপূর্ণশরাবান্ অগ্নেরুত্তরতঃ পৃথক্ পৃথক্ নিদধাতি তাম্রময়ং লৌহঞ্চ ক্ষুরং শীতোষ্ণোদকং নবনীতং দধি চ সক্রদাসাদ্য পূর্ণপাত্রনিধানান্তং কৃত্বা সত্যনামানমগ্নিং সংপূজ্য অগ্নেঃ পশ্চাদুপবিষ্টায়া মাতুরুৎসঙ্গস্থিতকুমার সমীপে সমীপত্রপূর্ণমনডুহগোময়ঞ্চ নবশরাবদ্বয়ং মাতুর্দ্দক্ষিণতো ব্রহ্মা পিতা বা একবিংশতিকুশপিঞ্জলীর্দ্দক্ষিণহস্তে স্থাপয়েৎ। সাগ্রং গর্ভশূন্যং প্রাদেশমিতং কুশপত্রদ্বয়ং সূত্রাদিবেষ্টিতং দর্ভপিঞ্জলীতি সংজ্ঞকম্। তত ইধ্মাধানাদ্যাঘারান্তং কুর্য্যাৎ। এতদাদি

বিবাহহোমান্তমাজ্যভাগৌ নস্তঃ। অগ্ন আয়ূংষীতি তিসৃণাং শতং বৈখানসা ঋষয়ঃ অগ্নিঃ পবমানো দেবতা গায়ত্রীচ্ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ুংষি পবস আসুরোর্জমিষঞ্চ নঃ। আরে বাধঃ সুদুচ্ছুনাং স্বাহা। ইদমগ্নয়ে পবমানায় নমঃ। ওঁ অগ্নির্ঋষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ং স্বাহা। ইদমগ্নয়ে পবমানায় নমঃ। অগ্নে পবস্ব স্বপা অস্মেবর্চ্চঃ সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষং স্বাহা। ইদমগ্নয়ে পবমানায় নমঃ। প্রজাপতে নত্বদিত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দ্দেবতা ত্রিষ্টুপ্ছন্দঃ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে নত্বদেবতান্যন্যো বিশ্বা জাতানি পরিতা বভূব। যৎকামাংস্তে জুহুমস্তন্নোঽস্তু বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি ক্রমেণ চতস্রঃ আজ্যাহুতীর্হুত্বা মাতুরঙ্কমারূঢ়কুমারস্য দক্ষিণতঃ পশ্চাচ্ছরাবং সংস্থাপ্য শীতোষ্ণমুদকং পৃথক্ শরাবস্থিতং পাণিভ্যাং গৃহীত্বা যুগপদেকপাত্রে মিশ্রীকুর্য্যাৎ ওঁ উষ্ণেন বায় উদকেনেহীতি। তাসামপামেকদেশং গৃহীত্বা নবনীতং তদভাবে দধিশরঃ তেন কুমারদক্ষিণকর্ণোপরি কেশান্ স্তেময়তি। ওঁ অদিতিঃ কেশান্ বপতু আপদ্রুন্দন্তু বর্চ্চসে। দীর্ঘায়ুষ্ট্বায় বলায় বর্চ্চসে। সর্ব্বকেশান্ দক্ষিণবামক্রমেণ ভাগদ্বয়ং কুর্য্যাৎ। দক্ষিণভাগং চতুর্দ্ধা কুর্য্যাৎ বামভাগং ত্রিধা কুর্য্যাৎ। ততো হোমকর্ত্তা তিস্রঃ কুশপিঞ্জুলীরাদায় কুমারস্য দক্ষিণকেশপক্ষে উত্তুর্থে ভাগে নিদধাতি। ওঁ ওষধে ত্রায়স্বৈনম্। ইতি নিধায় তান্ কেশান্ সপিঞ্জুলীন্ সব্যেন পাণিনা গৃহীত্বা তেষামুপরি তাম্রময়ং ক্ষুরং দক্ষিণহস্তে নিধায় তাম্রক্ষুরেণ সপিঞ্জুলীন্ কেশান্ ওঁ স্বধিতে মৈনং হিংসীঃ। ইত্যনেনাবপীড্য লোহক্ষুরেণ ছিনত্তি। ওঁ যেনাবপৎ সবিতা ক্ষুরেণ সোমস্য রাজ্ঞো বরুণস্য বিদ্বান্। তেন তে ব্রহ্মণো বপতেদমস্যায়ু

শ্মান্ জরদষ্টির্যথাসৎ। ইত্যনেন ছিন্নান্ প্রাগগ্রান্ শমীপত্রৈরেকীকৃত্য মাতুরঞ্জলৌ প্রযচ্ছতি। সা চ তাননডুহগোময়ে নিদ-
ধাতি ॥ ১ ॥ ততঃ পুনরপি অপর দক্ষিণ কেশচতুর্থভাগপক্ষে তথৈব পিঞ্জলনিধানাবপীড়নান্তং কর্ম্ম কৃত্বা লৌহক্ষুরং গৃহীত্বা
ওঁ যেন ধাতা বৃহস্পতেরগ্নেরিন্দ্রস্য চায়ুষে বপৎ। তেন তে আয়ুষে বপামি সুশ্লোক্যায় স্বস্তয়ে। ইতি দ্বিতীয়ং ছিন্দ্যাৎ ॥
তথৈব মাতা অনডুহগোময়ে নিদধাতি ॥ ২ ॥ পুনস্তথৈব অপর দক্ষিণ কেশপক্ষে পিঞ্জলনিধানাবপীড়নং কর্ম্ম কৃত্বা লৌহক্ষুরং
গৃহীত্বা ওঁ যেন ভূয়শ্চ রাত্র্যাং জ্যোকচ পশ্যতি সূর্য্যং তেন তে আয়ুষে বপামি সুশ্লোক্যায় স্বস্তয়ে। ইতি তৃতীয় কেশং
ছিন্দ্যাৎ। ছিত্বা তথৈব গোময়ে নিদধাতি ॥ ৩ ॥ ততঃ পুনরপি অপর দক্ষিণ কেশপক্ষে তথৈব পিঞ্জলনিধানাবপীড়নান্তং কর্ম্ম
কৃত্বা লৌহক্ষুরং গৃহীত্বা চতুর্থবারং কেশং ছিন্দ্যাৎ। পূর্ব্বোক্তৈস্ত্রিভির্মন্ত্রৈঃ। তথৈব গোময়ে নিদধাতি। ততো হোমকর্ত্তা
কুমারোত্তরতঃ পশ্চাৎ অবতিষ্ঠেতি দর্ভপিঞ্জলীনবহস্তশ্চ পিতা বামকর্ণোপরি কেশে পূর্ব্ববন্মন্ত্রপূর্ব্বকমুষ্ণোদকনবনীতত্র্যক্ষগর্ভ-
পিঞ্জলীত্রিকার্পণতাম্রক্ষুরপীড়নান্তং কর্ম্ম কৃত্বা প্রথমচ্ছেদনমন্ত্রেণ কেশান্ ছিত্বা মাত্রে দদ্যাৎ। এবং দ্বিতীয় কেশচ্ছেদনমন্ত্রেণ দ্বিতীয়
বারকেশচ্ছেদনম্। তৃতীয় কেশচ্ছেদনমন্ত্রেণ তৃতীয় বারকেশচ্ছেদনম্। তথৈব মাতা গোময়ে নিদধাতি। নাত্র সর্ব্বৈর্মন্ত্রৈশ্চতুর্থং
দর্ভপিঞ্জলীত্রিকাভাবাৎ। ততো হোমকর্ত্তা অঙ্গুষ্ঠোপকনিষ্ঠাভ্যাং অনেন মন্ত্রেণ ক্ষুরধারং মার্জ্জয়েৎ ওঁ যৎক্ষুরেণ মার্জ্জয়তা
সুপেশসা বপ্তাবপসি কেশান্ ছিন্ধি মাস্যায়ুঃ প্রমোষীঃ। ততো মাতা নাপিতহস্তে ক্ষুরং দত্বা নাপিতমনুশাস্তি। শীতোষ্ণা-
ভিরদ্ভিরক্ষন্নমুং কুশলীকুরু। করোমীতি নাপিতঃ। ততঃ শীতোষ্ণদকেন কুমারশিরসং ক্লেময়িত্বা সর্ব্বকেশান্ কুমারস্য মুণ্ডয়েৎ।

অস্মিন্ সময়ে কর্ণবেধঃ। ততো হোমকর্ত্তা প্রায়শ্চিত্তং সমাপ্য স্বিষ্টকৃতং সমাপয়েৎ। ততো দক্ষিণাদানম্। অন্যৎ সর্ব্বং সমম্। ব্রীহ্যাদি পূর্ণশরাবান্ নাপিতায় দদ্যাৎ। এতদমন্ত্রকমেব কুমার্য্যাঃ। বিবাহব্যতিরিক্তকর্ম্মসু বৃদ্ধিশ্রাদ্ধং চ নাস্ত্যস্যাঃ ॥ * ॥

॥ * ॥ ইতি শ্রীবাসুদেব ভট্ট বিরচিতাশ্বলায়নপদ্ধতৌ চূড়াকরণ প্রয়োগঃ ॥ * ॥

অথোপনয়নম্ ॥ * ॥ অষ্টমে বর্ষে গর্ভাষ্টমে বা উদগয়নে শুক্লপক্ষে শুভে হ্নি ব্রাহ্মণমুপনয়েৎ। তত্রোপনয়নদিনে পিতা নির্ব্বর্ত্তিতনিত্যকৃত্যঃ ওঁ অদ্যেত্যাদি কর্ত্তব্য কুমারসংস্কারোপনয়নাখ্য কর্ম্মাঙ্গমাভ্যুদয়িকং শ্রাদ্ধমহং করিষ্যে। ইতি সঙ্কল্প্য কৃতাভ্যুদয়িকঃ কর্ম্মস্থানমাগত্য কুমারং কৃতস্নানং অলংকৃতং বাচিতাশিষং লগ্নাৎ পূর্ব্বং ভুক্তবন্তং বাপিতশিরসং কারিতবিবিধ মঙ্গলস্নানং কৃতশৌচং আচান্তং বিধায় আচার্য্যঃ কৃতপ্রাণায়ামঃ অমুকং বিষ্ণুশর্ম্মাণমুপনেষ্যে। ইতি সঙ্কল্প্য শুভে মুহূর্ত্তে কুমারমাত্মসমীপমানীয় উপলেপনাদ্যগ্নিপ্রতিষ্ঠাপনান্তং কর্ম্ম কৃত্বা সমুদ্ভবনামানমগ্নিং সংস্থাপ্য। ঈষদ্ধৌতং নবং শ্বেতং সদৃশং যন্ন ধারিতম্। আহতং তদ্বিজানীয়াৎ সর্ব্বকর্ম্মসু পাবনম্। আহতবাসসী পরিধাপ্য প্রাবরণমপি বাসং কৃষ্ণাজিনঞ্চ নিধায় যজ্ঞোপবীতমেকং কুমারস্য বামস্কন্ধে। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং প্রজাপতের্যৎ সহজং পুরস্তাৎ। আয়ুষ্যমগ্রং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ। ইতি মন্ত্রেণ যজ্ঞোপবীতং দদ্যাৎ। কৃষ্ণাজিনঞ্চোত্তরীয়ঞ্চ দদ্যাৎ। প্রজাপতির্ঋষিস্ত্রিষ্টুপ্ছন্দঃ কৃষ্ণাজিনং দেবতা কৃষ্ণাজিনপরিধাপনে বিনিয়োগঃ। ওঁ মিত্রস্য চক্ষুর্দ্ধরণং বলীয়স্তেজো যশস্বি স্থবিরং সমৃদ্ধম্। অনাহতস্য বসনং জবিষ্ঠং পরীতং বাজজ্যজিনং দধেয়ম্। ইতি যথাবিভবং কুমারমলং কুর্ব্বীত। ততঃ আচান্তং কুমারং স্বদক্ষিণভাগে

উপবেশয়েৎ। মাণবকঃ করসংপুটঃ সন্ গুরুং যাচেত। ওঁ উপনয়ন্তু মাং যুষ্মৎপাদাঃ। ইতি ওঁ উপনেষ্যামি তবন্তুং ইতি গুরুণোক্তো বাঢ়ং ইতি কুমারো বদেৎ। ততঃ আচার্য্যঃ প্রাণানাযম্য কুমারসংস্কারার্থং উপনয়নাখ্য কর্ম্ম তদঙ্গমন্বাধানং দেবতা-পরিগ্রহার্থং করিষ্যে ইতি সংকল্প ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি দ্বে সমিধৌ ঘৃতাক্তে অগ্নাবাধায় অস্মিন্নন্বাহিতেঽগ্নৌ অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং প্রজাপতিঞ্চাঘারদেবতে আজ্যেনাগ্নিং পবমানমগ্নিং প্রজাপতিঞ্চ এতাঃ প্রধানদেবতা আজ্যদ্রব্যেণ হবিঃশেষেণ স্বিষ্টকৃতমিধ্মসংহন ন রুদ্রং বিশ্বান্ দেবান্ সংশ্রাবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুমগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যো-ঽহং যক্ষ্যে। ইতি সঙ্কল্প্য বর্হিরস্তারণাদীধ্মাধানান্তং কর্ম্ম কুর্য্যাৎ। সমুদ্ভবনামানমগ্নিং সংপূজ্য অথাচার্য্যো ঽগ্নেরুত্তরতঃ পশ্চা-দুপবিষ্টেন মাণবকেনান্বারব্ধশ্চতত্র আজ্যাহুতীর্জুহোতি। অগ্ন আয়ুংষীতি তিসৃণাং শতং বৈখানসা ঋষয়োঽগ্নিঃ পবমানো দেবতা দৈবী গায়ত্রীচ্ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ুংষি পবস আসুবোর্জমিষঞ্চ নঃ। আরে বাধঃ সুদুচ্ছুনাং স্বাহা। ইদমগ্নীপবমানাভ্যাং নমঃ॥ ১ ॥ ওঁ অগ্নির্ঋষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ং স্বাহা। ইদমগ্নী পবমানাভ্যাং নমঃ॥ ২ ॥ ওঁ অগ্নে পবস্ব স্বপা অগ্নে বর্চ্চঃ সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষং স্বাহা। ইদমগ্নীপবনাভ্যাং নমঃ॥ ৩ ॥ হিরণ্যগর্ভঋষিঃ প্রজাপতির্দেবতা ত্রিষ্টুপ্‌ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে নত্বদেবতান্যন্যো বিশ্বা জাতানি পরিতা বভূব। যৎকামাংস্তে জুহুমস্তন্নোঽস্তু বয়ং স্যামঃ পতয়ো রয়ীণাং স্বাহা। ইদং প্রজাপতয়ে নমঃ। অথাগ্নে-

॥•॥ সর্ব্বসংকর্ম্মপদ্ধতিঃ ॥•॥

রুত্তরতঃ প্রাঙ্মুখ আচার্য্য উর্দ্ধস্তিষ্ঠেৎ। ততঃ পুরস্তাৎ প্রত্যঙ্মুখো মাণবকঃ কৃতাঞ্জলিস্তিষ্ঠেৎ। অথাচার্য্যো ব্রহ্মচারিণোঽঞ্জলি-
মদ্ভিঃ পূরয়েৎ। তৎ সবিতুর্ব্বণীমহ ইতি শ্যাবাশ্ব ঋষিঃ সবিতা দেবতা ত্রিষ্টুপ্‌ছন্দো ঽঞ্জলিপূরণে বিনিয়োগঃ। ওঁ তৎ সবি-
তুর্ব্বণীমহে বয়ং দেবস্য ভোজনম্। শ্রেষ্ঠং সর্ব্বধাতমং তুরং ভগস্য ধীমহি। ইতি মন্ত্রেণ কুমারাঞ্জলাবাসাসিঞ্চেদ্‌গুরুঃ।
সো ঽপি তং ভূমৌ বিসৃজেৎ। ততো ব্রহ্মচারিণো দক্ষিণহস্তং সাঙ্গুষ্ঠং মন্ত্রপূর্ব্বকং গৃহ্ণাতি। সাঙ্খ্য ঋষিঃ সবিতাশ্বিপূষণো
দেবতা উপনয়নে মাণবকহস্তগ্রহণে বিনিয়োগঃ। ওঁ দেবস্য ত্বা সবিতুঃ প্রসবে ঽশ্বিনোর্ব্বাহুভ্যাং পূষ্ণো হস্তাভ্যাং শ্রী অমুক-
দেবশর্ম্মন্ হস্তং তে গৃহ্ণামি। ইত্যনেন। অমুক দেবশর্ম্মন্নিত্যত্র ব্রহ্মচারিণো নাম প্রয়োক্তব্যম্। যদি তু মৃতবৎসাসুতত্বাদিনা
পূর্ব্বং নাম ন কৃতং তদেদানীং কুর্য্যাৎ। ততঃ পুনরপি ওঁ তৎসবিতুর্ব্বণীমহ ইতি শ্যাবাশ্বঋষিঃ সবিতা দেবতা ত্রিষ্টুপ্‌ছন্দঃ
অঞ্জলিপূরণে বিনিয়োগঃ। ওঁ তৎ সবিতুর্ব্বণীমহে ইত্যাদি পূর্ব্বোক্তমন্ত্রেণ গুরুঃ কুমারমঞ্জলিং পূরয়েৎ। সোঽপি তং ভূমৌ
বিসৃজেৎ। প্রজাপতির্ঋষিঃ সবিতা দেবতা উপনয়নে মাণবকহস্তগ্রহণে বিনিয়োগঃ। ওঁ সবিতা তে হস্তমগ্রাহীৎ শ্রী অমুক দেব-
শর্ম্মন্ হস্তং তে গৃহ্ণামি ইতি সাঙ্গুষ্ঠং করং দ্বিতীয়বারং গৃহ্ণাতি। ততঃ পুনরপি তৃতীয়ামঞ্জলিপূরণাদি নামাদেশান্তরং কর্ম্ম কৃত্বা
প্রজাপতির্ঋষিরগ্নির্দেবতা উপনয়নে মাণবকহস্তগ্রহণে বিনিয়োগঃ। ওঁ অগ্নিরাচার্য্যস্তবাসৌ হস্তং গৃহ্ণামি শ্রী অমুকদেবশর্ম্মন্
ইতি তৃতীয়বার হস্তং গৃহ্ণাতি। অথাচার্য্যো ব্রহ্মচারিণমাদিত্যমীক্ষয়েৎ। ওঁ দেব সবিতরেষ তে ব্রহ্মচারী তং গোপায় সমামৃত
ইতি। অথাচার্য্যো ব্রহ্মচারিণং পৃচ্ছতি। কস্য ব্রহ্মচার্য্যসি। প্রাণস্য ব্রহ্মচার্য্যস্মি। কাস্ত্বামুপনয়েতে। কামস্ত্বা পরিদদামি।

স শৃণ্বংস্তিষ্ঠেৎ। অথাচার্য্যো ব্রহ্মচারিণমগ্নিং প্রদক্ষিণমাবর্ত্তয়তি। যুবা ইতি বিশ্বামিত্রঋষির্ধামো দেবতা ত্রিষ্টুপ্‌ছন্দোঽগ্নি-
প্রদক্ষিণীকরণে বিনিয়োগঃ। ওঁ যুবা সুবাসাং পরিবীত আগাৎ স উ শ্রেয়ান্ ভবতি জায়মানঃ। ইত্যর্দ্ধর্চ্চেন। অথাচার্য্য
উর্দ্ধস্তিষ্ঠন্ প্রাঙ্মুখো ব্রহ্মচারিণঃ প্রাঙ্মুখস্য উর্দ্ধস্থিতস্য পৃষ্ঠদেশে স্থিত্বা স্কন্ধয়োরুপরি হস্তং দত্ত্বা হৃদয়দেশং স্পৃশেৎ। ওঁ
তন্ধীবাসঃ কবয়ঃ উন্নয়ন্তি স্বাধ্যো মনসা দেবয়ন্তঃ ইত্যর্দ্ধর্চ্চেন। অথাচার্য্যব্রহ্মচারিণৌ প্রাঙ্মুখাবগ্নেঃ পশ্চিমতঃ উপবিশতঃ। ততো ব্রহ্ম-
চারী তস্মিন্নেবাগ্নৌ পরিসমুহ্য সমিধমেকাং আদধাতি। অপরাং মন্ত্রেণ। ওঁ অগ্নয়ে সমিধমাহার্ষ্যং বৃহতে জাতবেদসে। তয়া
ত্বমগ্নে বর্দ্ধস্ব সমিধা ব্রাহ্মণা বয়ং স্বাহা। ইতি মন্ত্রেণ। অথাগ্নিমুপস্পৃশ্য সোদকেন পাণিনা ব্রহ্মচারী বারত্রয়ং মুখং নির্ম্মার্ষ্টি।
ওঁ তেজসা মা সমনজ্মি তেজসা হ্যেবাত্মানং সমনজ্মি। ইতি প্রথম বারং সম্মার্জ্য হস্তং প্রক্ষাল্য অগ্নিমুপস্পৃশ্য ওঁ তেজসা
মা সমনজ্মি তেজসা হ্যেবাত্মানং সমনজ্মি। ইতি দ্বিতীয় বারম্। পুনস্তথৈব হস্তং প্রক্ষাল্যাগ্নিমুপস্পৃশ্য ওঁ তেজসা মা সম-
নজ্মি তেজসা হ্যেবাত্মানং সমনজ্মি। ইতি মন্ত্রেণ তৃতীয় বারম্। উত্থায়াঞ্জলিং বদ্ধাগ্নিমুপস্থাপয়তি। ময়ি মেধামিতি ষণ্ণাং
হিরণ্যগর্ভঋষিঃ পূর্ব্বত্রয়াণাং অগ্নীন্দ্রসূর্য্যা দেবতা উত্তরত্রয়াণামগ্নির্দেবতা যণ্ণামাসুরী গায়ত্রীচ্ছন্দোঽগ্ন্যুপস্থাপনে বিনিয়োগঃ।
ওঁ ময়ি মেধাং ময়ি প্রজাং ময্যগ্নিস্তেজো দধাতু। ওঁ ময়ি মেধাং ময়ি প্রজাং ময়ীন্দ্র ইন্দ্রিয়ং দধাতু। ওঁ ময়ি মেধাং ময়ি
প্রজাং ময়ি সূর্য্যো ভ্রাজো দধাতু। ওঁ যত্তে অগ্নে তেজস্তেনাহং তেজস্বী ভূয়াসম্ ওঁ যত্তে অগ্নে বর্চস্তেনাহং বর্চস্বী ভূয়া-
সম্। ওঁ যত্তে অগ্নে হরস্তেনাহং হরস্বী ভূয়াসম্। ইত্যেতৈস্ত্র্যর্থৈর্মন্ত্রৈরগ্নিমুপস্থায় আশীর্গৃহ্নীয়াৎ। মানস্তোক ইতি কোৎসঋষী

রুদ্রো দেবতা জগতীচ্ছন্দঃ আশীঃ কর্ম্মণি বিনিয়োগঃ। ওঁ মানস্তোকে তনয়ে মান আয়ুষি মানো গোষু মানো হশ্বেষু রী-রিষঃ। মানো বীরান্ রুদ্রভামিনো হবধীর্হবিষ্মন্তঃ সদসি ত্বা হবামহে। ইত্যনেন শ্রুবেণাঙ্গারান্নীত্বা শ্রৌবং ভস্ম অঙ্গুষ্ঠ কনিষ্ঠাভ্যাং গৃহীত্বা ওঁ ত্র্যায়ুষং জমদগ্নেঃ ইতি ললাটে। ওঁ কশ্যপস্য ত্র্যায়ুষং ওঁ অগস্তস্য ত্র্যায়ুষং ইতি নাভৌ। ওঁ যদ্দেবানাং ত্র্যায়ুষং ওঁ তন্নোহস্তু ত্র্যায়ুষং ইতি গলপৃষ্ঠে। শতায়ুষং মস্তকে হস্তং দত্ত্বা হস্তং প্রক্ষাল্য অগ্নিং প্রার্থয়েৎ। চম ইতি হিরণ্য-গর্ভঋষিঃ সারস্বতাগ্নির্দ্দেবতা অনুষ্টুপ্ছন্দঃ অগ্নিপ্রার্থনে বিনিয়োগঃ ওঁ চমেশ্বরশ্চ মে যজ্ঞো পতয়ে নমঃ। যত্তে ন্যূনং তস্মৈ ত উপধত্তে অতিরিক্তং তস্মৈ তে নমঃ। স্বস্তি শ্রদ্ধাং যশঃ প্রজ্ঞাং বিদ্যাং বুদ্ধিং শ্রিয়ং বলম্। আয়ুষ্যং তেজ আরোগ্যং দেহি মে হব্যবাহন। ওঁ নমঃ ওঁ নমঃ। ইতি প্রার্থয়েৎ। অথ ব্রহ্মচারী জানুদ্বয়ং ভূমৌ নিপাত্য গুরোঃ পাদাবুপ-সংগৃহ্নাতি। দক্ষিণপাণিনা দক্ষিণং সব্যেন পাণিনা সব্যমিতি অভিবাদয়ে শ্রী অমুক দেবশর্ম্মাহং ভোঃ। ইতি চরণোপরি শিরো হবনম্য পূর্ব্বগোপিতনাম্না ইত্যভিবাদয়েৎ। আয়ুষ্মান্ ভব সৌম্য শ্রী অমুক দেবশর্ম্মন্ ইত্যাচার্য্যো বদেৎ। অথ ব্রহ্মচারী পাণিভ্যাং শির আলভেৎ। অথ ত্রয়াদাচার্য্যঃ। অধীহি ভোঃ সাবিত্রীম্। ব্রহ্মচারী বদতি ভো অনুব্রূহি। অথাচার্য্যো ব্রহ্মচারিণঃ পাণী হস্তাভ্যাং গৃহীত্বা উত্তরীয়েণ বাসসা সমাচ্ছাদ্য ব্যাহৃতীনাং বিশ্বামিত্র ঋষির্গায়ত্রীচ্ছন্দঃ সবিতা দেবতা সাবিত্রীজপে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্ব স্তৎ সবিতুর্বরেণ্যং ভর্গো দেবস্য ধীমহি ধিয়ো য়ো নঃ প্রচোদয়াৎ ওঁ। ইতি সর্ব্বাং তৎ সবিতুর্বরেণ্যং ইতি প্রথমং পাদম্। ভর্গো দেবস্য ধীমহি ইতি দ্বিতীয়ং পাদম্। ধিয়ো যো নঃ প্রচোদয়াৎ ইতি তৃতীয়ং

পাদম্। এবং পাদশঃ পূর্ব্বমুক্ত্বা তাং সর্ব্বাং বাচয়ীত। যদি পাদং পাদং বক্তুং ন শক্নোতি তদা তৎ সবিতুঃ পাদার্দ্ধম্।
বরেণ্যং ইতি তদর্দ্ধম্। ভর্গো দেবস্য পাদার্দ্ধম্। ধীমহি ইতি তদর্দ্ধম্। ধিয়ো যো নঃ পাদার্দ্ধম্। প্রচোদয়াৎ ইতি পাদা
র্দ্ধম্। ইতি ক্রমেণ পূর্ব্বমুক্ত্বা ততঃ সর্ব্বং বাচয়ীত। ওঁ ভূরিতি পাঠয়েৎ ওঁ ভুবঃ ইতি পাঠয়েৎ। ওঁ স্বরিতি পাঠয়েৎ।
ততো গুরুর্ব্রহ্মচারিণো হৃদয়দেশসমীপে ঊর্দ্ধাঙ্গুলিং পাণিমুপদধাতি। প্রজাপতির্ঋষির্বৃহস্পতির্দ্দেবতা ত্রিষ্টুপ্ছন্দো মাণবকস্য
হৃদযালম্ভনে বিনিয়োগঃ। ওঁ মম ব্রতে তে হৃদয়ং দধামি মম চিত্তমনুচিত্তং তে অস্তু। মম বাচমেকমনা জুষস্ব বৃহস্পতিস্ত্বা
নিযুনক্তু মহ্যম্। ইতি। ততো গুরুর্মাণবকস্য কটিদেশে মেখলাং বধ্নাতি। বিশ্বামিত্রর্ঋষির্মেখলা দেবতা ত্রিষ্টুপ্ছন্দো মেখলা-
পরিধাপনে বিনিয়োগঃ। ওঁ ইয়ং দুরুক্তাৎ পরিবাধমানা-বর্ণং পবিত্রং পুনতী ন আগাৎ। প্রাণাপানাভ্যাং বলমাবহন্তী স্বসা- 
দেবী সুভগা মেখলেয়ম্। ইতি মন্ত্রেণ। ওঁ ঋতস্য গোপ্ত্রী তপসঃ পরস্বী ঘ্নতীরক্ষঃ সহমানা অরাতীঃ। সা নঃ সমন্তমনুপরেহি
ভদ্রয়া ধর্ত্তারস্তে মেখলে মা রিষাম। ইতি মন্ত্রেণ চ। অথাস্মৈ পালাশং দণ্ডমৃজুং সৌমদর্শনমব্রণং কেশসম্মিতং ধারয়তি।
ওঁ স্বস্তি নো মিমীতেতি স্বস্ত্যাত্রেয় ঋষির্বিশ্বেদেবা দেবতা ত্রিষ্টুপ্ছন্দো দণ্ডধারণে বিনিয়োগঃ। ওঁ স্বস্তি নো মিমীতেত্যাদি
পঞ্চর্চ্চেন। ততো ব্রহ্মচর্য্যমাদিশেৎ। ব্রহ্মচার্য্যসি ইতি গুরুঃ। ব্রহ্মচার্য্যস্মি ইতি মাণবকঃ। আপোশানং কর্ম্ম কুরু
ইতি গুরুঃ। করোমি ইতি মাণবকঃ। মা দিবা স্বাপ্সীঃ ইতি গুরুঃ। ন দিবা স্বপিমি ইতি মাণবকঃ। মূত্রপুরীষাদৌ মৃদ্ভিঃ
শৌচাচমনঞ্চ কুরু ইতি গুরুঃ। করোমি ইতি মাণবকঃ। আচার্য্যাধীনো বেদমধীষ্ব ইতি গুরুঃ। অধীয়ে ইতি মাণবকঃ।

ব্রহ্মচর্য্যং চর ইতি গুরুঃ। চরিষ্যামি ইতি মাণবকঃ। সায়ং প্রাতর্ভিক্ষেত। বাঢ়ং ইতি মাণবকঃ। সায়ং প্রাতঃ সমিধমাদধ্যাৎ। সর্ব্বত্র বাঢ়মিতি ব্রহ্মচারী। অথ সূত্রং দ্বাদশবর্ষাণি ব্রহ্মচর্য্যং গ্রহণান্তং বা। ততো ব্রহ্মচারী উদকং হস্তেন স্পৃষ্ট্বা বদ্ধাঞ্জলির্বদেৎ। ওঁ ত্বং ব্রতানাং ব্রতপতিরসি সাবিত্রীং দ্বাদশরাত্রঞ্চরিষ্যামি তচ্ছকেয়ং তন্মে রাধ্যাসম্। ইতি। ততো গৃহীতপাত্রং হস্তে কৃত্বা ভৈক্ষং প্রার্থয়েৎ। প্রথমং মাতরং বদেৎ। ভগবতী ভিক্ষাং দেহি। ততো মাতা উদকং হস্তে দত্ত্বা তণ্ডুলাদিকং দদ্যাৎ। ততঃ পিতরং যাচেত। ভবন্ ভিক্ষাং দেহি। সোঽপি উদকপূর্ব্বকং দদাতি। তদ্ভৈক্ষমাচার্য্যায় নিবেদয়েৎ। আচার্য্যোঽপি উপযুজ্যতামিত্যনুজ্ঞাং দদাতি। মাণবকোঽপ্যাচার্য্যদত্তভৈক্ষং তৎ সায়ং ভক্তুং স্থাপয়েৎ। ততো মাধ্যাহ্নিকঃ সন্ধ্যাদিকং বিধায়াহঃশেষং তিষ্ঠেৎ। ততঃ আচার্য্য প্রায়শ্চিত্তং সমাপ্য স্বিষ্টকৃতং সমাপয়তি। ব্রহ্মকর্ম্মপ্রতিষ্ঠার্থং দক্ষিণাং দদ্যাৎ॥ * ॥ * ॥ * ॥ * ॥

অথাস্তমিতে সূর্য্যে ব্রহ্মৌদনম্॥ * ॥ অস্তমিতে সূর্য্যে সন্ধ্যামুপাস্য উপলেপনাদ্যগ্নিপ্রতিষ্ঠাপনান্তং কর্ম্ম কৃত্বা আচার্য্যঃ প্রাণানায়ম্য। অনুপ্রবচনীয় হোমং তদঙ্গমন্বাধানং করিষ্যে ইতি সঙ্কল্প্য দেবতাপরিগ্রহার্থং প্রজাপতিং সমিদ্ভ্যাং ওঁ ভূর্ভুবঃ স্বঃ স্বাহা ইতি দ্বে সমিধাবগ্নাবাধায় অস্মিন্নন্বাহিতে হগ্নৌ অগ্নিং জাতবেদসমিধ্মেন প্রজাপতিং প্রজাপতিঞ্চাঘারদেবতে আজ্যেন সদসস্পতি সবিতৃবয়ঃ প্রধান দেবতাশ্চরুদ্রব্যেণ স্বিষ্টকৃতমিধ্মসন্নহনেন রুদ্রং বিশ্বান্ দেবান্ সংস্রাবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুং অগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনাজ্ঞাতমিতি তিস্র আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যো হহং

যক্ষ্যে ইত্যন্বাধায় নিধায় স্থাল্যাঙ্কুরোঃ প্রোক্ষণভাজনঞ্চ শ্রুবসুচাবিতি পাত্রাণ্যাসাদ্য বিপ্রভোজনপর্য্যাপ্তচর্বর্থযাচিততণ্ডুলাদিভিঃ। তথা চ কারিকা। বিপ্রাণাং ভোজনায়ালং তুষ্ণীং নির্বাপ্য যাচিতম্। তুষ্ণীং প্রোক্ষণঘাতাদি শ্রপণান্তং করোত্যথ। অতএব তুষ্ণীং নির্ব্বাপং তুষ্ণীংপ্রোক্ষণান্তং কৃত্বা চরুং শ্রপয়েৎ। আচার্য্যঃ শিষ্যস্থানে নিবেদয়েৎ। স্থালীপাকবিধানেন ভিক্ষালব্ধৈস্তণ্ডুলাদিভিশ্চরুশ্রপণং কৃত্বা আচার্য্যায় নিবেদয়েৎ কৃতং ব্রহ্মৌদনমিতি। অথাচার্য্য আজ্যসংস্কারাদ্যারভ্যান্তং কৃত্বা সদসম্পতি-মিত্যস্য মেধাতিথিঃ কণ্বঋষির্গায়ত্রীচ্ছন্দঃ সদসস্পতির্দেবতা চরুহোমে বিনিয়োগঃ। ওঁ সদসস্পতিমদ্ভুতং প্রিয়মিন্দ্রস্য কাম্যম্। সনিং মেধামযাশিষং স্বাহা। ইদং সদসস্পতে নমঃ॥ ১ ॥ ততঃ সবিতুরিত্যস্য মধ্যমো গাথিনো ধিয়ো বিশ্বামিত্রঋষির্গায়ত্রী-চ্ছন্দঃ সবিতা দেবতা চরুহোমে বিনিয়োগঃ। ওঁ তৎ সবিতুর্বরেণ্যং ভর্গো দেবস্য ধীমহি। ধিয়ো যো নঃ প্রচোদয়াৎ স্বাহা ইদং সবিত্রে নমঃ॥ ২ ॥ ওঁ ঋষিভ্যঃ স্বাহা ইদং ঋষিভ্যো নমঃ॥ ৩॥ ইতি চর্ব্বাহুতিত্রয়ং হুত্বা স্বিষ্টকৃদাহোমং পূর্ণাহুত্যন্তং সমাপ্য দক্ষিণান্দদ্যাৎ। অন্যৎ সর্ব্বং সমম্। হুতশেষং ব্রাহ্মণান্ ভোজয়িত্বা অন্যস্য নির্ব্বিঘ্নেন বেদাধ্যয়নং ভবত্বিতি ভবন্তো ব্রুবন্তু ইতি ভুক্তবতো ব্রাহ্মণান্ বাচয়ীত। তেঽপি তথৈব ব্রূয়ুঃ। অথ ব্রহ্মচারী কর্মান্তে পরিসমূহনপর্য্যুক্ষণে কৃত্বা সমিধমাধায় ভিক্ষাসাহৃত্য ক্ষারলবণবর্জ্জং ত্রিরাত্রমশ্নাতি। দ্বাদশরাত্রং সংবৎসরং বা অধঃ শয়ীত॥ * ॥

অথ মেধাজননম্ ॥ * ॥ দ্বিতীয়দিনাদর্ব্বাক্ সমাবর্ত্তনাৎ প্রাক্ কস্মিংশ্চিদ্দিনে একমূলং পলাশং তদভাবে কুশস্তম্বং বা আনীয় প্রাচ্যং প্রতীচ্যাং বা দিশি রোপয়েৎ। ওঁ অদ্যেত্যাদি মেধাজননম্ করিষ্যে ইতি সঙ্কল্প্য পলাশাদিকমলঙ্ক ত্যা-পূপাদিভিরভ্যর্চ্চ্য ত্রিঃ প্রদক্ষিণং পরিসিঞ্চন্তং ব্রহ্মচারিণমাচার্য্যোঽমুং মন্ত্রং পাঠয়েৎ। সুশ্রবঃ সুশ্রবা অসি যথা ত্বং সুশ্রবঃ সুশ্রবা অস্যেবং মাং সুশ্রবঃ সুশ্রবসং কুরু। যথা ত্বং দেবানাং যজ্ঞস্য নিধিপো অস্যেবমহং মনুষ্যাণাং বেদস্য নিধিপো ভূয়া-সমিতি ত্রির্জপন্ ত্রিঃ প্রদক্ষিণং করোতি। ততঃ পূর্ব্বধৃতমেখলাজিনবাসাংসি তত্র ত্যক্ত্বা অন্যানি যুবা সুবাসাঃ পরিবীত আগাৎ স উ শ্রেয়ান্ ভবতি জায়মানঃ। তন্ধীবাসঃ কবয় উন্নয়ন্তি স্বাধ্যো মনসা দেবয়ন্তঃ। ইতি মন্ত্রেণ বিভৃয়াৎ। ততো গৃহং প্রত্যা-য়াতে যজুর্ব্বেদং সামবেদমধীত্য তৃতীয়মৃগ্বেদমধ্যে তু কামস্য এতদেবোপনয়নমলং করণবর্জ্জিতং ভবতি। যদ্ব্যুপনীতস্য প্রায়শ্চিত্তং ভবেৎ তদা কেশবপনমেধাজননে অকৃত্বাপ্যুপনয়নং সমাপয়েৎ। যদেতদুপনীতস্য প্রায়শ্চিত্তং যদা ভবেৎ। কৃতাকৃতং তদুপনয়নং মেধাজননমেব চ। মেধাজননমাচারে ব্রহ্মচর্য্যা ভবেদিহ। ইতি কারিকাবচনাৎ ॥ * ॥ * ॥ ২৪৬

অথ বেদারম্ভপ্রয়োগঃ ॥ * ॥ গুরুঃ সঙ্কল্পং কৃত্বা উপলেপনাদ্যাঘারান্তং কৃত্বা স্বশাখাপূর্ব্ববেদাহুতিঃ হোমঃ কর্ত্তব্যঃ। তত্র ঋগ্বেদারম্ভে ওঁ পৃথিব্যৈ স্বাহা ওঁ ইদং পৃথিব্যৈ। ওঁ অগ্নয়ে স্বাহা ওঁ ইদং অগ্নয়ে। ততঃ সর্ব্ববেদসাধারণাহুতয়ঃ। শুষ্মন্ত্রেণ হোতব্যাঃ। ওঁ ব্রহ্মণে স্বাহা। ইদং ব্রহ্মণে। ওঁ প্রজাপতয়ে স্বাহা। ইদং প্রজাপতয়ে। ওঁ দেবেভ্যঃ স্বাহা। ইদং দেবেভ্যঃ ওঁ ঋষিভ্যঃ স্বাহা। ইদং ঋষিভ্যঃ। ওঁ শ্রদ্ধায়ৈ স্বাহা। ইদং শ্রদ্ধায়ৈ। ওঁ সদসস্পতয়ে স্বাহা। ইদং তস্মৈ। ওঁ অনুমতয়ে

স্বাহা। ইদমন্নমতয়ে। ইতি হুত্বা অগ্নেরুত্তরতঃ প্রাঙ্মুখোপবিষ্টঃ প্রত্যঙ্মুখায় গুরুমুখমীক্ষ্যমাণায় দক্ষিণহস্তেন গুরোর্দক্ষিণপাদং গৃহীত্বা বামহস্তেন বামপাদং গৃহীত্বা উপসন্নায় ওঁ কারমহাব্যাহৃতিপূর্ব্বকান্ পঠিত বেদাদীনধ্যাপয়েৎ। তত্র প্রথমং পাদাবচ্ছেদেন। দ্বিতীয়বারমর্দ্ধর্চ্চবচ্ছেদেন। তৃতীয়বারং সহৈব সর্ব্বমৃচং মাণবকং পাঠয়েৎ। অত্র প্রথমং স্বশাখায়া বেদারম্ভঃ। মধুচ্ছন্দা ঋষয়োঽগ্নির্দ্দেবতা গায়ত্রীচ্ছন্দো বেদারম্ভে বিনিয়োগঃ। ওঁ অগ্নিমীলে পুরোহিতং যজ্ঞস্য দেবমৃত্বিজম্। হোতারং রত্নধাতমম্॥ ইত্যাদি ॥ * ॥ * ॥ * ॥ * ॥ * ॥ * ॥

অথ সমাবর্ত্তনম্ ॥ * ॥ স্বাচরিতব্রহ্মচর্য্যো বিদ্যান্তে গুরুমর্থেন সন্তোষ্য তেনাধুজ্ঞাতঃ স্বয়মেব সমাবর্ত্তনং কুর্য্যাৎ। তত্র তানি দ্রব্যাণ্যর্জয়ীত। তথাচ সূত্রম্। কণ্ঠপরিধানযোগ্যং মণিমালং কুণ্ডলযুগলং বস্ত্রযুগ্মং উপানদ্যুগলং বৈণবদণ্ডদ্বয়ং মাল্যযুগ্মং করঞ্জবীজমঞ্জনং সর্ব্বৌষধিসুগন্ধানুলেপনং দ্বৌ উষ্ণীষৌ ছত্রদ্বয়ং শীতোষ্ণোদকং সর্ব্বমেতদাচার্য্যায়াত্মনে চ। যদ্যুভয়োর্ন বিন্দেত তদা আচার্য্যায়ৈব উপকল্পয়ীত সন্তোষং বা গুরোঃ কুর্য্যাৎ ইতি॥ সমাবর্ত্তনদিনে প্রাতঃ সমিধমাহরিষ্যন্নপরাজিতা দিশঃ সকাশাৎ যাজ্ঞিকীঃ প্রাদেশসম্মিতাঃ সমিধো অর্জয়ীত। তথা চ সূত্রম্। আর্দ্রামন্নাদ্যকামঃ শুষ্কাং পুষ্টিকামঃ তেজস্কামো বা আর্দ্রশুষ্কামুভয়কামঃ। সমিধমানীয় ভূমেরন্যস্যোপরি নিধায় কর্ম্মাঙ্গত্বেন ব্রাহ্মণেভ্যো গামর্থঞ্চ দক্ষিণান্দত্ত্বা শীতোষ্ণোদকেন স্নত্বাচান্তঃ ওঁ স্বস্তি নো মিমীতামিতি সূক্তং পঠিত্বা মাতৃপূজাপূর্ব্বকমাভ্যুদয়িকং কৃত্বা উপলেপনাদ্যগ্নি প্রতিষ্ঠাপনান্তং কর্ম্ম কৃত্বা কৃতপ্রাণায়ামো ব্রহ্মচারী ওঁ অদ্যেত্যাদি সমাবর্ত্তনহোমং করিষ্যে। ইতি সঙ্কল্প্য দেবতাপরিগ্রহার্থং প্রজাপতিং সমিদ্ভ্যাং ওঁ

ভূর্ভুর্বঃ স্বঃ স্বাহা। ইদং প্রজাপতয়ে নমঃ। ইতি দ্বে সমিধাবগ্নাবাধায় অস্মিন্নন্বাহিতেঽগ্নৌ অগ্নিং জাতবেদসমিধ্মেন প্রজা-
পতিং প্রজাপতিঞ্চাঘারদেবতে আজ্যেনাগ্নিং পবমানং প্রজাপতিঞ্চ এতাঃ প্রধানদেবতা আজ্যশেষেণ স্বিষ্টকৃতমিধ্মসন্নহনেন রুদ্রং
বিশ্বান্ দেবান্ সংস্রাবেণ সর্ব্বপ্রায়শ্চিত্তদেবতা অগ্নিং দেবান্ বিষ্ণুমগ্নিং বায়ুং সূর্য্যং প্রজাপতিঞ্চ জ্ঞাতাজ্ঞাতদোষনির্হরণার্থমনা-
জ্ঞাতমিতি তিস্রঃ আজ্যদ্রব্যেণ সাঙ্গেন কর্ম্মণা সদ্যোঽহং যক্ষে ইতি সঙ্কল্প্য ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে নমঃ।
বহ্নেরুত্তরতঃ প্রোক্ষণীং শ্রুবমাসাদ্য ইতি প্রকারেণ পাত্রাসাদনং কুর্য্যাৎ। ব্রীহিযবমাষতিলৈঃ পৃথক্ পৃথক্ শরাবান্ তাম্রক্ষুরং
লৌহক্ষুরং আনডুহগোময়ং শমীপত্রাণি শীতোষ্ণদকং নবনীতং দধি চ। মণিকুণ্ডলদ্বয়ং বস্ত্রদ্বয়ং ছত্রমুপানদ্যুগলং দণ্ডং স্রজং
করঞ্জবীজং পিষ্টং শ্রীখণ্ডং একবিংশতিকুশপিঞ্জলানি চ সকৃদাসাদয়তি। ততঃ প্রোক্ষণীমুত্তানাং কৃত্বা অনন্তরং গর্ব্ভৌ প্রাদেশ-
মাত্রাবনখচ্ছিন্নৌ সাগ্রৌ কুশৌ প্রোক্ষণ্যাং নিধায়াসিচ্য আসাদিতপাত্রাণ্যুত্তানীকৃত্য পবিত্রাভ্যামুদকমাদায় তাভিরদ্ভিস্ত্রিঃ
প্রোক্ষ্য ইধ্মঞ্চ বিস্রংস্য সপবিত্রপূর্ণপাত্রমদ্ভিরাপূর্য্য গন্ধপুষ্পাণি প্রক্ষিপ্য বহ্নেরুত্তরদিশ্যুপবিশ্য ব্রাহ্মণো দক্ষিণহস্তাঙ্গুষ্ঠমালভ্য
ওঁ অদ্যেত্যাদি মৎকর্ত্তব্য সমাবর্ত্তনকর্ম্মণি কৃতাকৃতাবেক্ষণরূপ ব্রহ্মকর্ম্ম কর্ত্তুং অমুক গোত্রং অমুক দেবশর্ম্মাণং ব্রাহ্মণমেভিঃ পাদ্যাদিভির-
ভ্যর্চ্চ্য ত্বামহং বৃণে। ওঁ বৃতোঽস্মীতি প্রতিবচনম্। অথাগ্নেঃ পূর্ব্বেণানীয় দক্ষিণতঃ প্রাগগ্রাস্তীর্ণ বিষ্টরং ব্রহ্মাসনমুপকল্প্য
প্রত্যঙ্মুখস্তিষ্ঠন্ ওঁ অহেদৈধিষিতব্যোদতস্তিষ্ঠামাস্য সদনেসীদামি সীদয়োঽস্মৎপাকতরঃ। ইত্যুচ্চার্য্য বামহস্তাঙ্গুষ্ঠানামিকাভ্যাং ব্রহ্মাসনা-
দ্দর্ভমেকং গৃহীত্বা নৈঋত্যাং দিশি প্রক্ষিপেদনেন মন্ত্রেণ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দ্দেবতা তৃণনিরসনে বিনিয়োগঃ। ওঁ

নিরস্তঃ পরাবসুঃ। ইতি তৃণং নিরস্য উদকমুপস্পৃশেৎ। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দ্দেবতা ব্রহ্মোপবেশনে বিনিয়োগঃ। ওঁ ইদমহমর্ব্বাগ্বসোঃ সদনে সীদ। সীদামীতি অত্যুত্তরম্। ইত্যভিমুখমুপবেশ্য তং স্পৃষ্ট্বা মন্ত্রং জপন্ প্রজাপতির্ঋষির্গায়ত্রী-চ্ছন্দো বিষ্ণুর্দ্দেবতা জপে বিনিয়োগঃ। ওঁ বৃহস্পতির্ব্রহ্মা ব্রহ্মসদন আশিষ্যতে বৃহস্পতে যজ্ঞং গোপায় স যজ্ঞং পাহি। ইত্যাজ্যং সপবিত্রং অগ্নেরুত্তরতঃ অঙ্গারানানীয় তেষ্বধিসৃত্য অধিসৃতং ঘৃতং অবজ্বাল্য দর্ভাগ্রদ্বয়মাজ্যে বিন্যস্য পুনস্তেনৈব জ্বলতোল্মুকেন ত্রিঃ পর্য্যগ্নীকরণং করোতি ঘৃতমুদ্বাস্যাঙ্গারাদ্ভূসংস্পর্শেনৈবাজ্যস্থালীমাকর্ষতি। অঙ্গুষ্ঠোপকনিষ্ঠাভ্যাং উত্তানপাণি-ভ্যাং অসংহতে উদগগ্রে আজ্যস্থে পবিত্রে গৃহীত্বা সবিতুস্ত্বেতি মন্ত্রস্য বামদেব্যঋষিঃ সবিতা দেবতা উষ্ণিক্‌ছন্দ আজ্যোৎ-পবনে বিনিয়োগঃ। ওঁ সবিতুস্ত্বা প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিরিতি। সকৃত্তূষ্ণীং দ্বিরাজ্যমুৎ-পূয় পবিত্রে প্রোক্ষ্যাগ্নৌ প্রক্ষিপ্যাগ্নেঃ পশ্চাদ্বহিরাস্তীর্য্য তস্মিন্নাজ্যং নিনীয় স্রুবসংমার্জ্জনং কুর্য্যাৎ। স্রুবস্য বিলমগ্রৈস্ত পৃষ্ঠমধ্যাৎ স্বমগ্রতঃ আরভ্য পৃষ্ঠতো যাবদুপবিষ্টাদ্বিলং ভবেৎ। কুশানাং মূলতো দণ্ডমেকৈকং ত্রির্ম্মৃজীত বৈ। প্রোক্ষ্য প্রতাপ্য চাসাদ্য বর্হিষুত্তরতো ঘৃতাৎ সংমার্জ্জনকুশানগ্নৌ ক্ষিপেৎ। বিশ্বানি নোদুর্গহা ইতি মাধ্যমাত্রেয়ো বসুশ্রুতঃ ঋষি-র্জাতবেদো ঽগ্নির্দ্দেবতা ত্রিষ্টুপ্‌ছন্দো ঽগ্ন্যলঙ্করণে বিনিয়োগঃ।• ওঁ বিশ্বানি নো দুর্গহা জাতবেদঃ সিন্ধুং ন নাবা দুরিতাতিপর্ষি। অগ্নে অত্রিবন্নমসা গৃণানো ঽস্মাকং বোধ্যবিতা তনূনাম্। যস্ত্বা হৃদা কীরিণা মন্যমানো মর্ত্ত্যং মর্ত্ত্যো যো হবীমি। জাত-বেদো যশোঽস্মাসু ধেহি প্রজাভিরগ্নে অমৃতত্বমস্যাং যস্মৈ ত্বং সুকৃতে জাতবেদ উলোকমগ্নে কৃণবস্যোনং অশ্বিনং সপুত্রিণং

২৪৭

বীরবন্তং গোমন্তং রয়িং ন স তেষস্তি। ইত্যচাগ্নিমভ্যর্চ্য আজ্যেনেধ্মমূলতো অগ্রতশ্চ সংস্পৃশ্যাদায় অয়ন্ত ইতি বামদেব-
ঋষির্জাতবেদোঽগ্নির্দ্দেবতা ত্রিষ্টুপ্ছন্দঃ ইধ্মধানে বিনিয়োগঃ। ওঁ অয়ন্ত ইধ্ম আত্মা জাতবেদস্তেনেধ্যস্ব বর্দ্ধস্ব চেদ্ধ বর্দ্ধয়
চাস্মান্ প্রজয়া পশুভির্ব্রহ্মবর্চসেনান্নাজ্যেন সমেধয় স্বাহা। ইদমগ্নয়ে জাতবেদসে নমঃ। ইতীধ্মমাধায় ওঁ প্রজাপতয়ে
স্বাহা। ইতি বায়বীং দিশমারভ্যাগ্নেয়ীং যাবৎ ওঁ প্রজাপতয়ে স্বাহা এবং নৈর্ঋতি কোণাদারভ্য ঐশানীং দিশং যাবৎ অবি-
চ্ছিন্ন ঘৃতধারাং ঋজুং জুহোতি। আঘারদ্বয়ে উদ্দেশত্যাগো নাস্তি। অগ্ন আয়ুংষীতি তিসৃণাং শতং বৈখানসা ঋষয়ঃ অগ্নিঃ
পবমানো দেবতা গায়ত্রীচ্ছন্দ আজ্যহোমে বিনিয়োগঃ। ওঁ অগ্ন আয়ুংষি পবস আসুরোর্জমিষঞ্চ ন। আরে বাধ সুদূৎসুনাং
স্বাহা। ইদমগ্নয়ে পবমানায় নমঃ॥ ১ ॥ ওঁ অগ্নির্ঋষিঃ পবমানঃ পাঞ্চজন্যঃ পুরোহিতঃ। তমীমহে মহাগয়ং স্বাহা। ইদম- ২৫০
গ্নয়ে পবমানায় নমঃ॥ ২ ॥ ওঁ অগ্নে পবস্ব স্বপা অগ্নে বর্চ্চ্য সুবীর্য্যম্। দধদ্রয়িং ময়ি পোষং স্বাহা ইদমগ্নয়ে পবমানায়-
নমঃ॥ ৩ ॥ প্রজাপতে ন ত্বদিত্যস্য হিরণ্যগর্ভঋষিঃ প্রজাপতির্দ্দেবতা ত্রিষ্টুপ্ছন্দো আজ্যহোমে বিনিয়োগঃ। ওঁ প্রজাপতে
ন ত্বদতান্যন্যো বিশ্বা রূপাণি পরিতা বভূব। যৎকামাস্তে জুহুমস্তন্নো হস্তু বয়ং স্যাম পতয়ো রয়ীণাং স্বাহা। ইদং
প্রজাপতয়ে নমঃ॥ ৪ ॥ ইত্যাহুতিচতুষ্টয়ং হুত্বা ব্রহ্মচারী মেখলামধস্তাদনেন মন্ত্রেণ মোচয়েৎ। শুনঃ শেফঋষিস্ত্রিষ্টুপ্ছন্দো
বরুণো দেবতা মেখলামোচনে বিনিয়োগঃ। ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমং শ্রথায়। অথাদিত্যব্রতে বয়ং তবা-
নাগসো হৃদিতয়ে স্যামঃ। তত আচার্য্যো দণ্ডকাষ্ঠমগ্নৌ ক্ষিপেৎ তুষ্ণীম্। ততঃ ক্ষুরনখলোমানি কারয়িত্বা পিষ্ট করঞ্জবীজে-

নাঙ্গমনুলিপ্য শীতোষ্ণাভিরদ্ভিঃ স্নাত্বাচম্যাগ্নিসমীপমাগম্য যুবং বস্ত্রাণীতি দীর্ঘতমঋষির্মিত্রাবরুণৌ দেবতে তৃষ্টুপ্‌ছন্দ আহ-
তবস্ত্রপরিধাপনে বিনিয়োগঃ। ওঁ যুবং বস্ত্রাণি পীবসা বসাতে দুঃধারচ্ছিদ্রানন্তরোহসর্গাঃ। অরাতিরতমনৃতানি বিশ্বা ঋতেন
মিত্রাবরুণা সচেথে। ইতি মন্ত্রেণ বাসসী পরিধায় উষ্ণীষং বধ্নীয়াৎ। ওঁ যজ্ঞোপবীতং পরমং পবিত্রং প্রজাপতের্যৎ সহজং
পুরস্তাৎ। আয়ুষ্যমগ্র্যং প্রতিমুঞ্চ শুভ্রং যজ্ঞোপবীতং বলমস্তু তেজঃ। ইতি মন্ত্রেণ যজ্ঞোপবীতং পরিধায় দ্বিরাচম্য ওঁ অশ্ম-
নস্তেজোঽসি চক্ষুর্মে পাহি। ইতি সব্যমীক্ষণমঞ্জয়িত্বা তেনৈব পশ্চাদ্বামঞ্চ। ওঁ অশ্মনস্তেজোঽসি শ্রোত্রং মে পাহি। ইতি
দক্ষিণ শ্রোত্রং কুণ্ডলেনালঙ্কৃত্য তেনৈব পশ্চাদ্বামং শ্রোত্রম্। কুঙ্কুমাদ্যনুলিপ্তাভ্যাং পাণিভ্যাং ব্রাহ্মণরাজন্যবৈশ্যশূদ্রস্ত্রীসেবকা
যথাক্রমং মুখবাহূদরোপস্থোরুচরণান্যনুলিম্পেয়ুঃ। পশ্চাৎ করৌ প্রক্ষাল্য ওঁ অনার্ত্তস্য নার্ত্তোঽহং ভূয়াসম্। ইতি স্রজমা-
বধ্য ওঁ দেবতাং পরিষ্ঠেঽহং সর্ব্বতো মাং পাতু। ইতি মন্ত্রেণ উপানহৌ পরিধায় ওঁ দিবচ্ছন্দাংসি ইতি মন্ত্রেণ ছত্রং ওঁ
বেণুরসি বানস্পত্যোঽসি সর্ব্বতো মাং পাহি ইতি বেণবদণ্ডম্। ওঁ আয়ুষ্যং বর্চ্চস্যং রায়স্পোষমৌদ্ভিদম্। ইদং হিরণ্যং বর্চ্চস্ব
জৈত্রায়া বিশতাদিমাম্। উচ্চৈর্ব্বাজিপৃতনাষাট্ সভা সাহং ধনঞ্জয়ম্। সর্ব্বা সমগ্রা ঋদ্ধয়ো হিরণ্যে ঽস্মিন্ সমাহিতাঃ।
শুন্যমহং হিরণ্যস্য পিতর্মানেবজগৃভ। এনমাং সূর্য্যত্বচমকরন্ পূরিষু প্রিয়ম্। সম্রাজঞ্চ বিরাজঞ্চ অভিষ্টির্যা চ মে ধ্রুবা। লক্ষ্মী
রাষ্ট্রস্য যা মুখে তয়া মামিন্দ্র সংসৃজ। অগ্নে প্রয়াতং পরিষদ্ধিরণ্যমমৃতং যজ্ঞেঽধিমর্ত্ত্যেষু। য এনদ্বেদ স হি বেদমর্হতি
জরামৃত্যুর্ভবতি যো বিভর্ত্তি। যদ্বেদ রাজা বরুণো যদ্বুত দেবী সরস্বতী। ইন্দ্রো যদ্বৃত্রহা বেদ তন্মে বর্চ্চস আয়ুষে। ন তদ্র-

ক্ষাংসি ন পিশাচাশ্চরন্তি দেবানামোজঃ প্রথমং হ্যেতৎ। যো বিভর্ত্তি দাক্ষায়ণা হিরণ্যং স দেবেষু কৃণুতে দীর্ঘমায়ুঃ। যদা বধ্নং দাক্ষায়ণা হিরণ্যং শৃতানীকায় সুমনস্যমানাঃ। তন্ন আবধ্নামি শতশারদা যা যুষ্মান্ জরদষ্টির্যথাসম্। ঘৃতাতুল্লু পো মধুমৎ সুবর্ণং ধনঞ্জয়ো বরুণো ধারয়িষ্ণুঃ। ঋণং সপত্নাদধরাংশ্চকৃণ্বন্নারোহ মাং মহতে সৌভগায়। প্রিয়ং মা কুরু দেবেষু প্রিয়ং রাজসু মা কুরু। প্রিয়ং বিশ্বেষু গোপ্তেষু ময়ি ধেহি রুচারুচম্। অর্ব্বাঞ্চমিন্দ্র সমুচো হবামহে যো গোজিদ্ধনজিদশ্বজিদ্ভ্যঃ। ইমং নো যজ্ঞং বিহরেষু স্মাস্য কুর্ম্মোঽহরিবো মে দিনং ত্বা। ইতি মন্ত্রেণ কণ্ঠে সুবর্ণময় মণিং বধ্নীয়াৎ। ততো ব্রহ্মচারী অগ্নিসমীপং গত্বা অগ্নেরৈশান্যাং দিশি উর্দ্ধস্থিতঃ সোষ্ণীষোপানহৌ ত্যক্ত্বা বক্ষ্যমাণমন্ত্রেণ সমিধমেকামগ্নৌ দদ্যাৎ। ওঁ ঋতঞ্চ মে অনৃতঞ্চ মে তন্ম উভয়ব্রতম্। নিন্দা চ মে অনিন্দা চ মে তন্ম উভয়ব্রতম্। বিদ্যা চ মে অবিদ্যা চ মে তন্ম উভয়ব্রতম্। প্রজ্ঞা চ মে অপ্রজ্ঞা চ মে তন্ম উভয়ব্রতম্। ইষ্টঞ্চ মে অনিষ্টঞ্চ মে তন্ম উভয়ব্রতম্। দত্তঞ্চ মে অদত্তঞ্চ মে তন্ম উভয়ব্রতম্। অধীতঞ্চ মে অনধীতঞ্চ মে তন্ম উভয়ব্রতম্। কৃতঞ্চ মে অকৃতঞ্চ মে তন্ম উভয়ব্রতম্। সত্যঞ্চ মে অসত্যঞ্চ মে তন্ম উভয়ব্রতম্। শ্রুতঞ্চ মে অশ্রুতঞ্চ মে তন্ম উভয়ব্রতম্। ব্রতঞ্চ মে অব্রতঞ্চ মে তন্ম উভয়ব্রতম্। যদগ্নেঃ সেন্দ্রস্য সপ্রজাপতিকস্য সঋষিকস্য সদেবস্য সদেব রাজন্যস্য সপিতৃকস্য সপিতৃরাজন্যস্য সাকাশস্য সানুপ্রকাশস্য সপ্রতীকাশস্য সদেবমনুষ্যস্য সদেবাপ্সরস্কস্য সহিরণ্যৈঃ পশুভির্গ্রাম্যৈশ্চ যন্ম আত্মন আত্মনি ব্রতং তন্মে সর্ব্বব্রতমিদমহমগ্নে সর্ব্বতো ভবামি স্বাহা। ইদমগ্নয়ে নমঃ। অথ ব্রহ্মচার্য্যুপবিশ্য মমাগ্নে বর্চ্চো বিহবে স্বস্ত্ব ইতি দশভির্ঋগ্‌ভিঃ প্রাদেশমিতাঃ সমিধো জুহুয়াৎ। মমাগ্নে ইতি সূক্তস্য বিহব্য ঋষির্বিশ্বেদেবা দেবতা অষ্টৌ ত্রিষ্টুপছন্দস

অন্যে জগতীচ্ছন্দঃ সমিদ্ধোমে বিনিয়োগঃ। ওঁ মমাগ্নে বর্চ্চো বিহবেষস্তু বয়ন্ত্বিন্ধানাস্তন্বং পুষেম। মহ্যং নমন্তাং প্রদিশশ্চতস্রস্ত্বয়া-
ধ্যক্ষেণ পৃতনা জয়েম স্বাহা। ইদমগ্নয়ে নমঃ॥ ১ ॥ ওঁ মম দেবা বিহবে সন্তু ইন্দ্রবন্তো বিষ্ণুরগ্নিঃ। মমান্তরীক্ষমুরুলোক
মস্তু মহ্যং বাতঃ পবতাং কামোঽস্মিন্ স্বাহা॥ ২ ॥ ওঁ ময়ি দেবা দ্রবিণমাযজন্তাং মষ্যাশীরস্তু ময়ি দেবহূতিঃ। দৈব্যা
হোতারোঽবনুশন্তঃ পূর্ব্বরিষ্টা স্যাম তন্ব্রা সুবীরা স্বাহা॥ ৩ ॥ ওঁ মহ্যং যজন্তু ময়ি জানি হব্যাগৃতিঃ সত্যা মনসো মেঽস্তু
যে নো মানিগাং কতমশ্চ নাহং বিশ্বেদেবাসোঽধিরোচমানঃ স্বাহা॥ ৪ ॥ ওঁ দেবী যন্নূবী বরুণঃ ক্রুণেতি বিশ্বে দেবাস
ইহ বীররধ্বন্। মহাস্মহি প্রজাগ্না মা তনূভির্ম্মা বধাম দ্বিষতে সোমরাজন্ স্বাহা॥ ৫ ॥ ওঁ অগ্নে মন্যুং প্রতিনুদন্ পরে-
যামদমদব্ধো গোপঃ। নহি নস্বং প্রত্যঞ্চ যন্তু নিগুড়ঃ পুনস্তেনৈষাং চিত্তং প্রবুধাং নিবেশৎ স্বাহা॥ ৬ ॥ ওঁ ধাতা ২৫৩
ধাতৃণাং ভুবনস্য যস্পতেঃ। দেবং ত্রাতারমিতি মাতিযাহম্। ইমং যজ্ঞমশ্বিনোভা বৃহস্পতির্দ্দেবাঃ পান্তু জয়মানং ন্যর্থাৎ
স্বাহা॥ ৭ ॥ ওঁ উরুব্যচানো মহিষঃ শর্ম্ম যং সদাস্মিন্ হবে পুরুহূতঃ পুরুক্ষুঃ। স নঃ প্রজাটৈয় হর্য্যস্বমৃলয়েন্দ্রমানো রীরিষো
মাপরতোঃ স্বাহা॥ ৮। ওঁ যে নঃ সপত্না অপতে ভবন্ত্বিন্দ্রাগ্নীভ্যাং যজ্ঞমপবাধামহে তান্। বসবো রুদ্রা আদিত্যা উপরি
স্পৃশন্ বোঽগ্রং চেত্তারমধিরাজন্ স্বাহা॥ ৯ ॥ ওঁ অর্ব্বাঞ্চমিন্দ্রমরুতো হবামহে যো গোজিদ্ধনজিদশ্বজিহ্বঃ। ইমং নো
বিহবেষুস্বাস্য কুর্ম্মোঽরিবো মে দিনং ত্বা স্বাহা॥ ১০॥ ইতি দশসমিধো হুত্বা স্বিষ্টকৃতং সমাপ্য প্রায়শ্চিত্তং সমাপয়েৎ॥ * ॥

অথ ব্রহ্মচারিণঃ কর্ত্তব্য নির্ণয়ঃ। ব্রহ্মচারী ন নক্তং স্নায়াৎ। ন দিবা স্বপেৎ। ন নগ্নাং স্ত্রিয়মীক্ষেৎ। বর্ষতি ন ধাবেৎ। ন বৃক্ষমারোহেৎ। ন সংশয়মাপদ্যেৎ। ইত্যাদ্যেতৎ সর্ব্বং গুরুণোপদেষ্টব্যম্। অথ মানবকো গৃহীতদণ্ডছত্রঃ সোপানৎকঃ সোষ্ণীষঃ কপটরোষমাচরন্ পদাতিঃ কতিচিৎ পদানি গচ্ছেৎ। তমন্যৈরাগতাদিভিঃ সহ সংতোষ্যানয়ন্তীতি ॥ * ॥ * ॥

॥ * ॥ ইতি আশ্বলায়নপদ্ধতৌ সমাবর্ত্তন প্রয়োগঃ ॥ * ॥

ওঁ নমো গণেশায়। অথ সামগানাং শ্রাদ্ধ প্রয়োগঃ ॥ * ॥ প্রণম্য সচ্চিদানন্দং কৃষ্ণং ত্রিভুবনেশ্বরং। শ্রাদ্ধপ্রয়োগ তত্ত্বানি বক্তি শ্রী রঘুনন্দনঃ। অথ শ্রাদ্ধসূত্রং। বিপ্রপ্রাপ্ত্যা শ্রাদ্ধকৃতৌ সুখার্থং ক্রমসূচনং। শ্রাদ্ধপূর্ব্বদিনে মাংসস্ত্রীত্যাগশ্চৈক ভোজনং। শ্রাদ্ধাহে দন্তকাষ্ঠস্য ত্যাগঃ স্নানং তথোষসি। যাম্যাস্যত্বং পাদশৌচে বাস্ত্বর্চ্চা বিষ্ণুকীর্ত্তনং। তস্মৈ পূজা মূল্যদানং পরভূস্বামিনে হথবা। তৎপিতৃভ্যশ্চাগ্রদানং রক্ষা দীপকুশদ্বিজাঃ। শ্রাদ্ধানুজ্ঞাচ গায়ত্রী দেবতাভ্য ইতি ত্রিধা। স্বজ্জলপ্রোক্ষণং রক্ষা জলস্থাপনমেকতঃ। পূর্ব্বং বিপ্রকরে তোয়ং কুশাসনমনন্তরং। দক্ষিণে দেববিপ্রস্য পিতৃবিপ্রস্য বামতঃ। আবাহনার্ঘ্যং ন্যুব্জঞ্চ গন্ধাদির্দক্ষবামতঃ। ঐশানীক্রমতো রেখা প্রাগগ্রা দেবমণ্ডলে। নৈর্ঋতী ক্রমতো রেখা প্রাগগ্রা পিতৃমণ্ডলে। পাত্রাণাং তেষু বিন্যাসো হোমপ্রশ্নো হগ্নিহোমকং। হুতশেষপ্রদানঞ্চ পাত্রালম্ভো হন্নবেশনং। ইদমিত্যঙ্গুলেঃ ক্ষেপস্তস্কন্ধীং দৈবে যবস্য চ। পিত্র্যে মন্ত্রেণ নিক্ষেপস্তিলস্যাপহতেতি চ। মধুনোহন্নে চ নিক্ষেপো গায়ত্র্যাস্ত্রির্জপস্ততঃ। মধুবাতেত্র্যচা চৈব মধুশব্দত্রয়েণ চ। অন্নাভিমন্ত্রণং তস্য দানং জলনিবেদনং। গায়ত্র্যাদি ত্রিকজপো হন্নহীন জপস্তথা। দ্বিজভাবেহপি তৃপ্ত্যর্থং গায়ত্র্যাদি ত্রিকস্য চ। পুণ্যাখ্যানস্য চ জপঃ সতিলং প্রোক্ষিতে কুশে। অগ্নিদগ্ধেতি মন্ত্রাভ্যাং সতিলান্ননিবেদনং। হস্তক্ষালশ্চাচমনং হরিস্মৃতির্জলস্য চ। পিত্র্যাদিক্রমতো দানং গায়ত্র্যাদি জপঃ পুনঃ। শেষান্নপিতরোঃ প্রশ্ন নিহন্মীতি চ মণ্ডলে। অপহতানিহন্মিভ্যাং রেখা যুগ্মং পিতৃক্রমাৎ। আস্তরে দেবতেত্যস্য জপ আবাহনং তিলৈঃ। অবনেজনদানঞ্চ মধুবাতা মধুত্রয়ং। অক্ষন্নমী পিণ্ডদানং দর্ভে লেপাবঘর্ষণং। আচমনং স্মৃতির্বিষ্ণোঃ পাত্রক্ষালাবনেজনং। অত্রেত্যাদি জপোবামাবর্ত্তনোদঙ্মু তঃ। আয়ত্যামী জপ- ২৫৫

শ্চৈব শ্বাসত্যাগোঽঞ্জলিস্তুতঃ। নম ইত্যাদিক জপো বাসো দানঞ্চ পূজনং। বসন্তায় জপশ্চৈব দ্বিজাগ্রভূমিসেচনং। দৈবাদি
ব্রাহ্মণে দানং জলাদি ত্রিতয়স্য চ। অদৈবমপি চাক্ষয্যমঘোরা গোত্রমিত্যপি। সপবিত্র কুশাঃ পিণ্ডে স্বধাবাচনমূর্জকং।
ন্যুব্জোত্থানাং পিতুঃ পক্ষে দক্ষিণাদানমগ্রতঃ। বিশ্বেদেবাশ্চ দাতারো দেবতেতি জপস্ত্রিধা। বিসর্জ্জনং বাজ ইতি অমাবেতি প্রদ-
ক্ষিণং। অন্নাদেঃ প্রতিপত্তিশ্চ বামদেব্য জপস্তথা। দীপপ্রচ্ছাদনং হস্তক্ষালনাচমনে তথা। অচ্ছিদ্রবাচনং বিষ্ণুস্মরণং শেষ
ভোজনং। উপবাসদিনে স্নাণং মাংসেতরাশিতাব্রতে তদ্দিনে মৈথুনত্যাগঃ শ্রাদ্ধকৃচ্ছ্রাদ্ধভোজিনোঃ॥ * ॥ * ॥

অথ পার্ব্বণশ্রাদ্ধপ্রয়োগঃ ॥ * ॥ তত্র পূর্ব্বদিনে কৃতনিরামিষৈকভক্তঃ শ্বঃ কর্ত্তব্যত্বানিশ্চয়ে তদ্রহিতোপি ততঃ পরদিনে কৃতনিত্যক্রিয়ো দ্বিবাসা দক্ষিণাপ্লবনে দেশে দক্ষিণাভিমুখীভূয় কৃতপাদশৌচো দর্ভহস্তঃ প্রাঙ্মুখ উদঙ্মুখো বা দ্বিরাচম্য পাষাণাস্থিশর্করেষ্টকাদিযুতাং পঙ্কিলাং কৃমিযুক্তাং সঙ্কটাং দুর্গন্ধামনিষ্টশব্দাং ভূমিং ত্যক্ত্বা গোময়োপলিপ্তায়াং ভূমৌ দর্ভাসনে চোপবিশ্য তিলতৈলেন ঘৃতেন বা দীপং প্রজ্বাল্য নারায়ণং সংপূজ্য ভোজ্যাদিকমুৎসৃজেৎ। তদ্যথা ভোজ্যাদিকমানীয় প্রাঙ্মুখঃ এতে গন্ধপুষ্পে ওঁ সোপকরণামান্ন ভোজ্যেভ্যো নমঃ। ইতি ত্রিঃ সংপূজ্য এতে গন্ধপুষ্পে এতদধিপতয়ে শ্রীবিষ্ণবে নমঃ। এতে গন্ধপুষ্পে এতৎ সম্প্রদানেভ্যো ব্রাহ্মণেভ্যো নমঃ। ইতি সংপূজ্য কুশত্রয়সহিতজলমাদায় ওঁ অদ্যামুকে মাস্যমুক পক্ষে অমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ অমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য মাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রমাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য বৃদ্ধপ্রমাতামহস্যামুক দেবশর্ম্মণঃ পার্ব্বণশ্রাদ্ধবাসরে অমুক গোত্রস্য পিতুরমুকদেবশর্ম্মণঃ অমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য মাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রমাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য বৃদ্ধপ্রমাতামহস্যামুক দেবশর্ম্মণঃ স্বর্গকামঃ এতানি সোপকরণামান্ন ভোজ্যানি অর্চ্চিতানি শ্রীবিষ্ণুদৈবতানি যথানাম গোত্রেভ্যো ব্রাহ্মণেভ্যো হহং দদানি। পর্ব্বেতরত্র পার্ব্বণবিধিক শ্রাদ্ধবাসর ইতি সর্ব্বত্র প্রয়োক্তব্যং ওঁ অদ্যেত্যাদি কৃতৈতৎ ভোজ্যদানকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং ফলং শ্রীবিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি। ইতি দক্ষিণাং কুর্য্যাৎ। কৃতৈতৎ সোপকরণামান্ন ভোজ্যদান কর্ম্মাছিদ্রমস্তু। ওঁ বাস্তুপুরুষায় নমঃ ইতি বাস্তুং সংপূজয়েৎ। ততঃ ওঁ

২৫৭

তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততমিতি বিষ্ণুং স্মৃত্বা ওঁ তৎসদিত্যুচ্চার্য্য যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং দত্ত্বা গঙ্গাং সংপূজ্য স্তুত্বা পরকীয় ভূমৌ চেৎ তৎস্বামিনে মূল্যমথবা পিতৃরীত্যা ইদমন্নং ওঁ এতৎ ভূস্বামি পিতৃভ্যঃ স্বধা ইত্যনেন দদ্যাৎ। ততশ্চ স্ব স্ব ভূমাবস্বামিকায়াঞ্চ ন দদ্যাৎ। অস্বামিকাশ্চ সর্ব্বা অটব্যঃ পর্ব্বতা নদীপ্রবাহাদুভয়ত শ্চতুর্হস্তাবচ্ছিন্নভূময়ঃ পুণ্যানি পুরুষোত্তমাদীনি আয়তনানি গয়াদীনি ক্ষেত্রাণি দণ্ডকাদীনি অরণ্যানি মহানদীনান্তু গঙ্গাদীনাং গর্ভস্তদুপরি সার্দ্ধশতহস্তং তীরং তদুপর্য্যুভয়তঃ ক্রোশদ্বয়ং গঙ্গাক্ষেত্রং এতা ভূময়ো রাজাদীনাং স্ববশীকৃতা অপি অস্বামিকাঃ। তদ্ধ্যানং আদিত্যপুরাণে। প্রসন্নবদনাঃ সৌম্যা বরদা শক্তিপাণয়ঃ। পদ্মাসনস্থা দ্বিভুজা বসবোঽষ্টৌ প্রকীর্ত্তিতাঃ। করে ত্রিশূলিনো বামে দক্ষিণে চাক্ষমালিনঃ। একাদশ প্রকর্ত্তব্যা রুদ্রা স্ত্রাক্ষেন্দুমৌলয়ঃ। পদ্মাসনস্থা দ্বিভুজা পদ্মাগর্ভাঙ্গকান্তয়ঃ। করাদিস্কন্ধপর্য্যন্তনালপঙ্কজধারিণঃ। ইন্দ্রাদ্যা দ্বাদশাদিত্যাস্তেজো মণ্ডলমধ্যগাঃ। তত্র পিতরং বস্বাকারেণ পিতামহং রুদ্রাকারেণ প্রপিতামহং আদিত্যাকারেণ ধ্যায়েৎ। এবং মাতামহাদীনামপি। সর্ব্ব দৈবকৃত্যমুত্তরাভিমুখঃ পাতিতদক্ষিণজানুরুপবীতী কুর্য্যাৎ। সর্ব্বঞ্চপিতৃকৃত্যং দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী কুর্য্যাৎ। ততো দৈবে প্রাঙ্মুখঃ দ্বিদর্ভযুক্ত যবোদকপ্রোক্ষিতমাসনং পশ্চিমদিশ্যুপকল্প্য পিত্র্যে তিলোদকপ্রোক্ষিত দক্ষিণাগ্রৈকদর্ভযুক্তমাসনদ্বয়ং দক্ষিণস্যাদ্দিশ্যুপকল্প্য প্রণবোচ্চারণপূর্ব্বকং সার্দ্ধদ্বিতয়বেষ্টনযুক্তোর্দ্ধকেশসপ্তপঞ্চান্যতরদর্ভনির্ম্মিতং দর্ভবটুত্রয়ং দৈবে পশ্চিমাগ্রত্বেন প্রাঙ্মুখং পিত্র্যে দক্ষিণাগ্রত্বেনোদঙ্মুখং এবং মাতামহসম্বন্ধিনং দৈবপিতৃমাতামহাসনেষু নিধায় তান্ কুশময় ব্রাহ্মণান্ স্নাপয়িত্বা পাদ্যাদিভিরভ্যর্চ্চ্য জলগণ্ডূষং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুকগোত্রস্য পিতুর- ২০৮

মুক দেবশর্ম্মণঃ অমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য মাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রমাতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য বৃদ্ধপ্রমাতামহস্যামুক দেবশর্ম্মণো মহালয়ামাবস্যাবিহিত-পার্ব্বণশ্রাদ্ধে কর্ত্তব্যে ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেষাং দেবানাং মহালয়ামাবস্যাবিহিত পার্ব্বণশ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে। ইতি পৃচ্ছেৎ। ওঁ কুরুষেতি প্রতিবচনম্। ততো দক্ষিণা মুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী পিত্র্যে জলগণ্ডূষং দত্ত্বা ওঁ অদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণোঽমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণোঽমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ মহালয়ামাবস্যাবিহিতপার্ব্বণশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষেতি প্রতিবচনম্ ততো মাতামহপক্ষেঽপ্যেবং। যথা জলগণ্ডূষং দত্ত্বা ওঁ অদ্যামুকে মাসি অমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য মাতামহস্যামুক দেব-শর্ম্মণো ঽমুকগোত্রস্য প্রমাতামহস্যামুক দেবশর্ম্মণো ঽমুক গোত্রস্য বৃদ্ধ প্রমাতামহস্যামুক দেবশর্ম্মণো মহালয়ামাবস্যাবিহিতপার্ব্বণ শ্রাদ্ধং দর্ভময়ব্রাহ্মণে ঽহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষেতি প্রতিবচনম্। এবং দীপান্বিতামাবস্যাবিহিত পার্ব্বণশ্রাদ্ধম্। নবা-ন্নাগমনবিহিত পার্ব্বণশ্রাদ্ধম্। অশ্বযুক্ কৃষ্ণপক্ষীয় মঘানক্ষত্রযুক্ত ত্রয়োদশীবিহিত পার্ব্বণশ্রাদ্ধম্। পূর্ণিমাপ্রতিপৎসন্ধৌ রাহুগ্রস্তনি-শাকরদর্শননিমিত্তক পার্ব্বণশ্রাদ্ধম্। যথাযুক্তং বাক্যে দেয়ং এবমন্যত্রাপ্যূহ্যম্। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং প্রণবান্তাং জপ্ত্বা ওঁ দেবতাভ্য পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি ত্রিঃ পঠেৎ। ততঃ পুণ্ডরী-কাক্ষং স্মৃত্বা মৃজ্জলেন শ্রাদ্ধীয় দ্রব্যপ্রোক্ষণং কর্ত্তব্যম্। রক্ষার্থমুদকপাত্রমেকং দেশে স্থাপয়েৎ। ততো উত্তরামুখঃ পাতিতদক্ষিণ-

বশ্বান্ দেবানাবাহয়িষ্যে ইতি পৃচ্ছেৎ। আবাহয়েত্যনুজ্ঞাতঃ। ও বিশ্বেদেবাস আগত ইত্যনয়া ঋচাবাহয়েদেতি কাত্যায়নঃ। (১) মন্ত্রো যথা। বিশ্বেদেবাস আগত শৃণুতা ম ইমং হবং ইদং বর্হির্নিষীদতঃ। অস্যার্থঃ। হে বিশ্বেদেবাস যূয়ং মে মম ইমং হবং আহ্বানং শৃণুত শৃণুতা শ্রুত্বা চ আগত আগচ্ছত আগত্য চ ইদং বর্হিঃ কুশং নিষীদত আসনার্থমুপকল্পিতে বর্হিষি উপবিষ্টা ভবত ইত্যর্থঃ। অত্র বিশ্বেদেবাস ইতি অজ্জসেরসুগিতি অসুগাগমঃ। শৃণুত ইত্যর্থঃ

জানূরুপবীতী দৈবব্রাহ্মণহস্তে জলং দত্ত্বা ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা এতদ্বঃ কুশাসনং নমঃ। ইতি ঋজুদর্ভান্ দেবব্রাহ্মণদক্ষিণপার্শ্বে দদ্যাৎ। ততঃ দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী পিতৃব্রাহ্মণহস্তে জলং দত্ত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নেতত্তে কুশাসনম্ ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধা। ইতি দ্বিগুণ ভুগ্ন দর্ভ মোটকং পিতৃ ব্রাহ্মণ বাম পার্শ্বে দদ্যাৎ। তত উত্তরামুখঃ দৈবে যবান্ গৃহীত্বা ওঁ বিশ্বান্ দেবানাবাহয়িষ্যে (১) ইতি পৃচ্ছেৎ। ওঁ আবাহয়েত্যুত্তরম্। ওঁ বিশ্বেদেবাস আগত শৃণুতা ম ইমং হবং ইদং বর্হির্নিষীদত ইত্যাবাহ্য তুষ্ণীং যবান্ বিকীরেৎ (২) ততঃ কৃতাঞ্জলিঃ। ওঁ বিশ্বেদেবাঃ শৃণুতেমং হবং যে মে হন্তরীক্ষে য উপদ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বম্ (৩)। ওঁ ওষধয়ঃ সমবদন্ত সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্

তস্য তা ইতি তস্য স্থানে তাদেশঃ। আগত ইতি আগচ্ছত ইত্যস্মিন্নর্থে বর্ণাগমো বর্ণবিপর্যয়েশ্চেতি নিরুক্ত লক্ষণেন ছকারলোপঃ। ইদং বর্হিরিতি সপ্তম্যর্থে দ্বিতীয়া কর্ম্মপ্রবচনীয়ত্বাৎ (২) ততো যববিকীরণানন্তরং অবকীর্য্য বিশ্বেদেবাঃ শৃণুতেতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ বিশ্বেদেবা শৃণুতেমং হবং যে মে হন্তরীক্ষে য উপ-

দ্যবিষ্ঠ যে অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বং। অস্যার্থঃ হে বিশ্বেদেবা যে মম ইমং হবং আহ্বানং শৃণুত কিন্তু তা যূয়ং অন্তরীক্ষে আকাশে ষ্ঠ তিষ্ঠত তথা যে উপসমীপে পৃথিব্যাং তিষ্ঠত দ্যবি স্বর্গে যে তিষ্ঠতেতি সম্বন্ধঃ। দ্যবিষ্ঠেতি ছান্দসত্বাৎ যত্বম্। এতদুক্তং ভবতি। ভূমাবাকাশে স্বর্গে চাবস্থিতা যে বিশ্বেদেবাঃ কে তে অগ্নিজিহ্বাঃ অগ্নিরেব জিহ্বা হুতভোজনসাধনং যেষাং তে তথোক্তাঃ। উত বা অপ্যর্থে যে যজত্রাঃ যজন্তং শ্রাদ্ধকর্ত্তারং ত্রায়ন্ত ইতি যজত্রাঃ। পুরূরবো মাদ্রবঃ প্রভৃতয়ঃ যূয়ং আস্তৃতে কুশে আসাদ্য মাদয়ধ্বং হর্ষযুক্তা ভবতেত্যর্থঃ। (৩) ওঁ ওষধয়ঃ সমবদন্ত সোমেন সহ রাজ্ঞা যস্মৈ কৃণোতি ব্রাহ্মণস্তং রাজন্ পারয়ামসি। অস্যার্থং। হে বিশ্বেদেবাস ন কেবলং যূয়মেব হর্ষযুক্তাঃ কিন্তু ভবদধিষ্ঠানযুক্তমাত্মানং বহুমন্যমানা ওষধয়ঃ কুশাঃ সোমেন সহ রাজ্ঞা সহাসীনাঃ সমবদন্ত স্থিরীভূতাঃ যতঃ সোম ওষধনামধি-

পারয়ামসীতি [ ৪ ] জপেৎ। ততঃ পিতৃপক্ষে তিলান্ গৃহীত্বা ওঁ পিতৄনাবাহয়িষ্যে ইতি ব্রাহ্মণং পৃচ্ছেৎ। ওঁ আবাহয়েত্যুত্তরম্। ওঁ এত পিতরঃ সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত [ ৫ ] ওঁ উশ-

পতিঃ। কিঞ্চ হে সোম রাজন্ ত্বং ব্রাহ্মণো হসি ভবসি অতো যস্মৈ ব্রাহ্মণায় শ্রাদ্ধভোক্তৃত্বেনোপকল্পিতায় আসনং কুশান্তরেণসম্বদ্ধং কৃণোতি দধাতি তং ব্রাহ্মণমপি মাম্ সর্ব্বতো ভাবেন পারয় শ্রাদ্ধভোজনকৃতপাপান্মোচয় ইত্যধ্যাহার্য্যং কৃণোতীতি বিভক্তিব্যত্যয়ে মধ্যমে প্রথমপুরুষঃ তিঙাং তিঙিতি স্মরণাৎ-আসিতি অব্যয়ানামনেকার্থত্বাৎ সর্ব্বতোভাবেহপি দ্রষ্টব্যম্। এতজ্জপানন্তরম্। পিতৄনাবাহয়িষ্যে ইতি কাত্যায়নঃ। গোভিলোহপি তিলানাদায় ওঁ কারং কৃত্বা পিতৄনাবাহয়িষ্যে ইতি পৃচ্ছতি। আবাহয় ইত্যনুজ্ঞাতঃ। ওঁ এত পিতরঃ ওঁ উশন্তস্ত্বা ইতি ঋগ্দ্বয়াভ্যামাবাহ্য ও আয়ান্তু নঃ পিতর ইতি মন্ত্রং জপিত্বা ওঁ অপহতেতি ঋচা তিলান্ বিকীর্য্য ইতি। (৪) মন্ত্রো যথা। এত পিতর সোম্যাসো গম্ভীরেভিঃ

পথিভিঃ পূর্ব্বিণেভির্দ্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত। অস্যার্থঃ। হে পিতরঃ পিতৃপিতামহপ্রপিতামহ মাতামহ প্রমাতামহ বৃদ্ধপ্রমাতামহপ্রভৃতয়ো হস্মিন্নাস্তৃতে বর্হিষি এত আগচ্ছত। কিম্ভূতা যূয়ং সোম্যাসো সোমো দেবতা যেষাং ইতি সোম্যাসঃ সোমাস ইতি ট্যণ সোম্য পূর্ব্ববজ্জসেরসুগাগামঃ। কৈরাগমনমিত্যাকাঙ্ক্ষায়ামাহ। পথিভিরিতি কিম্ভূতৈঃ গম্ভীরেভিঃ গম্ভীরৈর্দ্দেবাদীনাং প্রসিদ্ধ বর্ত্ম ভিরিত্যর্থঃ গম্ভীরেভিরিতিছান্দসত্বাৎ ভিসো নৈসাদেশঃ পুনঃ কিম্ভূতৈঃ পূর্ব্বিণেভিঃ পূর্ব্বপুরুষাণাং কব্যবাহনাদীনাং গমনাগমনপ্রসিদ্ধবর্ত্মভিরিত্যর্থঃ। আগতা চ নো হস্মাকং ভদ্রং কল্যাণং দ্রবিণে ক্রমাগতধনে চ দত্ত কুরুত হ ইতি সম্বোধনবাচকঃ। ন কেবলং লব্ধবিত্তে কিঞ্চ রৈঞ্চ লভ্যরূপং ধনঞ্চ যৎ সর্ব্বং নিযচ্ছত রৈমিতি ছান্দসত্বাৎ নিরুক্ত লক্ষণেন অসো হকারলোপঃ। কিম্ভূতং ধনং সর্ব্ববীর সর্ব্ববীরমিতি ব্যত্যয়েন জসোহম্ সর্ব্বেষাং বীরাণাং শৌর্য্যাদিযুক্তানাং যৎ প্রার্থনীয়ং তদপি প্রযচ্ছত ইত্যাশংসাবাক্যার্থঃ। পূর্ব্বিণেভিরিতি পূর্ব্বশব্দাদ্বহুলং ঔণাদিক ইন প্রত্যয়ঃ

ত্বস্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত অবাহ পিতৄন্ হবিষে হত্তবে [৬] ইত্যাবাহ্য কৃতাঞ্জলিঃ। ওঁ আয়ান্তু নঃ পিতরঃ সোম্যাসো হগ্নিস্বাত্তাঃ পথিভির্দ্দেবযানৈঃ। অস্মিন্ যজ্ঞে স্বধয়া মদন্তো হধিব্রুবন্তু তে অবন্ত্বস্মান্ [৭] ইতি জপ্ত্বা ওঁ অপহতাসুরা 

ছান্দসত্বাৎ অকারলোপে ন সন্ধিঃ। লক্ষণাস্তরোধান্ন বৃদ্ধিঃ ছন্দসাং ভিস্ ঐসাদেশবাধাদেত্বং গম্ভিরেভিরিতি বহুলং ছন্দসীতি ঐস্ ন ভবতি। (৫) উশন্তস্ত্বা ইত্যৃচাবাহয়েদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ পিতৄন্ হবিষে অত্তবে। অস্যার্থঃ। অত্রাগ্নিরিত্যধ্যাহার্য্যাম। হে অগ্নে ত্বা ত্বাং নিধীমহি আদধীমহি আধানং তব কুর্ম্ম ইতি যাবৎ বয়মিত্যধ্যাহার্য্যম্। কিম্ভূতা বয়ং ত্বামুশন্তঃ ইচ্ছন্তঃ কিঞ্চ ন কেবলং উশন্ত এব বয়ং ত্বাং সমিধীমহি প্রজ্বালয়ামঃ ত্বঞ্চ অস্মাভিরাহিতো জ্বলিতঃ সন্ পিতৄন্ অগ্নিস্বাত্তাদীন্ আবহ আবাহয়। কিম্ভূতস্ত্বং উষন্ পিতৄন্ ইচ্ছন্। কিম্ভূ তান্ পিতৄন্ উশতঃ ইচ্ছতঃ। কিমর্থমাবাহনমিত্যাহ আবাহনীয়ে অস্মদ্দত্তস্য হবিষে হত্তবে অদনার্থং। অত্তব ইতি অদেরৌণাদিকস্তুন্ প্রত্যয়ঃ হবিষ ইতি ষষ্ঠ্যর্থে চতুর্থী বিভক্তিব্যত্যয়াৎ। হে অগ্নে আধানজ্বলনাভ্যাং আরাধিতস্ত্বং পিতৄন্ অস্মাকং শ্রাদ্ধাদেয়স্য হবিষো ভক্ষণার্থং আবহ আনয় ইত্যর্থঃ। (৬) আবাহনানন্তরং অবকীর্য্য আয়ান্ত নো জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ

আয়ন্তু নঃ পিতরঃ সোম্যা সো অগ্নিস্বাত্তাঃ পথিভিদেবযানৈরস্মিন্ যজ্ঞে স্বধয়া মদন্তোঽধিব্রুবন্তু তে অবন্ত্বস্মান্। অস্যার্থঃ। নোঽস্মাকং পিতর আয়ান্তু আগচ্ছন্তু। কিম্ভূতাঃ সোম্যাসঃ সোম্যাঃ সোমপাখ্যাঃ সোমাত্ত্বাণ লক্ষণাঽরোধাম্ন বৃদ্ধিঃ স্যোম্যাস ইতি বা পাঠঃ শাখান্তরীয়ঃ। ন কেবলং সোম্যা এব পিতরঃ অগ্নিস্বাত্তাশ্চ শ্রৌতস্মার্ত্তাদিভিরগ্নিভিঃ স্বাত্তাঃ অনগ্নিদগ্ধানামত্রাধিকারো নাস্তীতি সংস্কৃত্যাঃ যে পিতর ইত্যর্থঃ শ্রৌতস্মার্ত্তাদিভিরগ্নিভিঃ সংস্কারঃ কৃতঃ ইত্যর্থঃ। কৈরাগচ্ছন্তুঃ পথিভির্বর্ত্মভিঃ। কিম্ভূতৈর্দেবযানৈর্দেবানাং যানং গমনং যৈর্বর্ত্মভিস্তৈরাগতঃ তে পিতরো ঽস্মিন্ শ্রাদ্ধরূপে যজ্ঞকর্ম্মণি অস্মান্ অধিব্রুবন্তু শ্লাঘয়ন্তু ইত্যর্থঃ। কিম্ভূতাস্তেমদন্তঃ তৃপ্যন্তঃ কয়া স্বধয়া। পিতৃণামন্নেন স্বধাশব্দোঽত্রান্নবাচী। পিতৃদানে স্বধাশব্দস্তদন্নে চ প্রকীর্ত্তিতঃ। ন কেবলং অধিব্রুবন্তু বিস্তুবন্তু রক্ষন্তু চ তে ঽস্মানিত্যাশংসাবাক্যার্থঃ। (৭)ততঃ পাত্রেষু

রক্ষাংসি বেদিসদ ইতি তিলান্ বিকীরেৎ। ততো জলং স্পৃষ্ট্বা দৈবাদিক্রমেণ ব্রাহ্মণসম্মুখে দক্ষিণাগ্রদর্ভোপরি সপ্ত পাত্রাণি সংস্থাপ্য ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ ইত্যনেনানখচ্ছিন্নং প্রাদেশমাত্রং ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যনেন প্রোক্ষিতং দ্বিদলং পবিত্রং একৈকস্মিন্ পাত্রে একৈকং বিন্যস্য তেষু প্রত্যেকং ওঁ শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ [ ৮ ] ইতি দৈবাদিক্রমেণ জলং দদ্যাৎ। ততো দৈবে ওঁ যবোঽসি যবয়াস্মদ্দ্বেষো যবয়ারাতীর্দিবে ত্বা ঽন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং লোকাঃ পিতৃসদনাঃ পিতৃসদনমসীতি [ ৯ ] যবান্ বিকীরেৎ। ততঃ পিত্রাদি পাত্রেষু ওঁ তিলোঽসি সোমদৈবত্যো গোসবো দেবনির্ম্মিতঃ।

জলং দদ্যাৎ শন্নো দেবীরিতি কাত্যায়নঃ। মন্ত্রো যথা। শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ। অস্যার্থঃ। এতা অর্ঘ্যার্থমুপকল্পিতা আপো নোঽস্মাকং শং ভবন্তু কল্যাণপ্রদা ভবন্ত্বিত্যর্থঃ। কিম্ভূতা আপঃ দেবীর্দেব্যঃ দেবনাদিগুণযুক্তাঃ। কিমর্থমভিষ্টয়ে উপচারার্থং পীতয়ে পানার্থং অভীষ্টয় ইত্যর্থে ছান্দসত্বাৎ হ্রস্বঃ। কিঞ্চ নো ঽস্মাকং শংযোঃ কল্যাণসংযোগায় অভিস্রবন্তু অভিমুখা ভবন্তু ইত্যাশংসাবাক্যার্থঃ। শংযোরিতি চতুর্থ্যর্থে ষষ্ঠী। দেবীরিতি সুপাং সুপ ইতি জসস্থানে শম্। বিভক্তিব্যত্যয়াৎ। (৮) ততো দৈবে যবান্ বিকীরেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ যবোঽসি যবয়াস্মদ্দ্বেষো যবয়ারাতীর্দিবে ত্বা অন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং

লোকাঃ পিতৃসদনাঃ পিতৃসদমসি। অস্যার্থঃ। ত্বং যবোঽসি যবো ভবসি যতস্তদস্মদ্দ্বেষোঽস্মদুপজাতশত্রূন্ যবয়ঃ পৃথক্ কুরু সংহতিরহিতান্ কুরু ইত্যর্থঃ। ন কেবলং দ্বেষ এব কিন্তু অরাতীঃ সহজশত্রূনপি যবয় অসংহতান্ কুরু। বেদে অরাতিশব্দঃ স্ত্রীলিঙ্গোঽপি যতস্ত্বং পৃথক্ শরীরো অতোঽস্মাকং শত্রূন্ পৃথক্ কুরু। দ্বেষঃ কৃত্রিম শত্রুঃ। তথা চ দ্বেষঃ কৃত্রিমশত্রৌ স্যাদরাতিঃ সহজে স্ত্রিয়ামিত্যভিধানকাণ্ডম্। ব্রহন্নাপমিনী যুমিশ্রণে যবয় ইতি পচাদ্যচি কৃতে তৎ করোতি তদাচষ্ট ইতীন্ দ্বেষ ইতি দ্বিষ ইত্যথে ছান্দস একারঃ। ত্বা ত্বাং অন্তরীক্ষায় নভোগতায় দিবে স্বর্গগমনায় পৃথিব্যৈ পৃথিবীলাভায় রাজ্যপ্রাপ্তয়ে স যুপা স্মহে ইত্যর্থঃ। কিন্তু হে যব ত্বয়া শত্রুক্ষয়াদি রূপেণ উপকৃতা

প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা [ ১০ ] ইতি প্রত্যেকং তিলান্দদ্যাৎ। ততো দৈবাদি ক্রমেণ তুষ্ণীং গন্ধ-
পুষ্পে দত্ত্বা কুশান্তরেণাচ্ছাদ্য দৈবে ওঁ অচ্ছিদ্রমিদমর্ঘ্যপাত্রমস্তু ইতি ব্রূয়াৎ। ওঁ অস্ত্বিতি ব্রাহ্মণৈরুক্তে দেবব্রাহ্মণহস্তে অর্ঘ্যপা- ২৩৪
ত্রীয় প্রাগগ্রং পবিত্রং দত্ত্বা জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ শিরঃ প্রভৃতিসর্ব্বগাত্রেভ্যো নমঃ। ইত্যনেন সংপূজ্য তৎপাত্রং

লোকাঃ কব্যপালাদিরূপাঃ শুন্ধন্তাং শুদ্ধিভাবা ভবন্তু। কিন্তু তাঃ পিতৄণাং সদনং ভবনমাপন্না পিতৃলোকমাপন্নাঃ ইত্যর্থঃ। কিন্তু হে যব ত্বমপি পিতৃসদনমসি পিতৄণাং ভবনং ভবমীতি যতঃ অতঃ শত্রূন্ যবয়েত্যর্থঃ। (৯) তত একৈকস্মিন্নপি পাত্রে তিলান্ নির্ব্বপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ তিলোঽসি সোমদেবত্যো গোসবো দেব-নির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা অস্যার্থঃ। তিলস্ত্বমসি। কিংভূতঃ সোমদেবত্যঃ সোমো দেবতা অস্যেতি দেবতার্থে যনপি রূঢ়িতঃ কচি-দধিকারান্ন বৃদ্ধিঃ। পুনঃ কীদৃশঃ গোসবঃ গাং স্বর্গং সুতে দদাতি গোসবঃ যতস্তিলোঽয়ং দত্তঃ সন্ দাতুঃ পাপোপনয়নানন্তরং স্বর্গপ্রাপ্তিঃ স্যাৎ। অপি কীদৃশঃ দেব-

নির্ম্মিতঃ দেবেন বিষ্ণুনা নির্ম্মিতঃ। তথা চ শ্রুতিঃ বিষ্ণুদেহোদ্ভবাঃ পুণ্যাস্তিলা ইতি। পুনঃ কীদৃশঃ অদ্ভিঃ পৃক্তঃ জলেন মিশ্রিতঃ যত এবম্ভূতস্ত্বং তদস্মাকং পিতৄন্ লে... পিতৃপিতামহপ্রপিতামহ প্রভৃতীন্ প্রত্নং চিরকালং যথা স্যাত্তথা স্বধয়া স্বকারেণ প্রীণাহি প্রীতান্ কুরু। প্রীণাহীতি ছন্দসত্বাদীকারো ন ভবতি। যদ্যপি পিতৃকর্ম্মে স্বাহাকারো ন যুক্তস্তথাপি কাত্যায়নেন মহর্ষিণা স্বাহাকারেণ মন্ত্রস্য পঠিত্বা তদনুপপত্তির্নাশঙ্কনীর্যয়া। প্রত্নমিতি কশ্চিদব্যয়মিত্যাচষ্টে পরমার্থতস্তু প্রযত্ন শব্দস্য নিপাতনাদ্বহুল ব্রাহ্মণী যত্ন গিতি যলোপঃ প্রত্নমিতি প্রযত্ন যথা স্যাদিতি তথাচাভিধানকাণ্ডম্। চিরকালে প্রযত্নে চ প্রত্নমিত্যভিধীয়তে। (১০) অথ একৈকস্য একৈকেন দদাতীতি কাত্যায়নঃ। মন্ত্রোযথা ওঁ যাদিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষ্যা উত পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ সং শ্যোনাঃ সুহবা ভবন্তু। অস্যার্থঃ। আপঃ পানীয়ানি

বামহস্তে কৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষ্যাঃ উত পার্থিবীর্যা হিরণ্যবর্ণ যজ্ঞিয়াস্তা ন আপঃ শিবাঃ সংশ্যোনাঃ সুহবা ভবন্তু ইতি পঠিত্বা (১১) ওঁ পুরূরবোমাদ্রবসৌ বিশ্বেদেবা এতদ্বোঽর্ঘ্যং নমঃ। ইতি ব্রাহ্মণে ঽর্ঘ্যং দদ্যাৎ। 

পয়সা ক্ষীরেণ সংবভূবুঃ সঙ্গতাঃ মাধুর্য্যশৈত্যাদিনা একীভাবমাপন্নাঃ কাস্তা আপঃ যা দিব্যাঃ দিবি স্বর্গে ভূতাঃ যা অন্তরীক্ষ্যাঃ আকাশভবাঃ উত অপ্যথে যাঃ পার্থিবীঃ পৃথিবীসম্বন্ধাঃ পুনঃ কীদৃশ্যঃ হিরণ্যবর্ণাঃ রজতবদ্বিশুদ্ধাঃ। হিরণ্যং রজতেঽপি দৃশ্যতে। তথা চ। হিরণ্যং রজতেঽপি স্যাৎ সুবর্ণে চ কপর্দ্দকে। পুনঃ কীদৃশ্যঃ যজ্ঞিয়াঃ যজ্ঞার্হাঃ তদর্হতীতি প্রত্যয় ছন্দসি বহুলমিতি হ্রস্বঃ। তদেবম্ভূতা আপো নো ঽস্মাকং শিবা ভবন্তু কল্যাণপ্রদা ভবন্ত্বিত্যর্থঃ। ন কেবলং কল্যাণপ্রদা এব কিন্তু সংশ্যোনাঃ সুখদা অপি ভবন্তু। ন কেবলং সংশ্যোনা এব সুহবা অপি ভবন্তু ব্রাহ্মণহস্তে দত্তাঃ সুখেন হুতা ভবন্ত্বিত্যর্থঃ শৈত্যাদিগুণেনাভিব্যঞ্জনেন ব্রাহ্মণস্য সুখসম্পাদকা ভবন্তু ইত্যর্থঃ। শ্যোনা ইতি সুখস্য নাম নিরুক্তে চ দৃশ্যতে। শ্যোনঃ স্যাৎ সুখতৃষ্ণয়োরিতি। পার্থিবীরিতি বিভক্তিব্যত্যয়ে প্রথমায়াঃ দ্বিতীয়েতি (১১ প্রথমপাত্রে

সংস্রবান্ সমবনীয় পাত্রং ন্যুব্জং করোতীতি কাত্যায়নঃ। মন্ত্রো যথা। ও পিতৃভ্যঃ স্থানমসি। হে পাত্র নেঽস্মাকং পিতৃভ্যঃ পিতৃপিতামহ প্রপিতামহাদীনাং স্থানং আধারো ঽসি পিতৃভ্য ইতি ষষ্ঠ্যর্থে চতুর্থী। অতঃ পিতৃভ্য ইতি পিতৃপিতামহপ্রপিতামহাদীনামিতি যোজনীয়ম্। যতস্ত্বং পিতৄণাং স্থানং অতস্তেষাং অবস্থানং ন্যুব্জী-



ততঃ পিতৃপক্ষে দক্ষিণামুখঃ প্রাচীনাবীতী পাতিতবামজানুঃ পিতৃব্রাহ্মণে দক্ষিণাগ্রং পবিত্রং দত্ত্বা তুষ্ণীং জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ ওঁ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নমঃ ইতি সংপূজ্য বামহস্তে পাত্রং ধৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা ইতি পঠিত্বা তৎ পাত্রং ভূমৌ সংস্থাপ্য বামহস্তেন বিধৃত্য দক্ষিণহস্তেনান্বারব্ধঃ। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে ঽর্ঘ্যং ওঁ যে চাত্র ত্বামনু- যাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যর্ঘ্যং দত্ত্বা পাত্রস্থ শেষজলরূপসংস্রবসহিতং পাত্রং পূর্ব্বস্থানে স্থাপয়েৎ। এবং প্রত্যেকং জলং স্পৃষ্ট্বা পিতামহাদি পঞ্চভ্যোঽর্ঘ্যং দত্ত্বা সংস্রবসহিতপাত্রাণি যথাস্থানে সংস্থাপ্য পিতৃপাত্রে পাত্রপাতমক্রমেণ জলং গ্রাহ্যং পশুপ্রোক্ষণবৎ। অশ্বে যস্য প্রোক্ষণং তস্য ছেদনঞ্চাগ্রে যথাক্রমং পঞ্চপাত্রসংস্রবং গৃহীত্বা প্রপিতামহপাত্রেণ পিধায় স্ববামে সমূলদর্ভোপরি সংস্রবসহিতং পাত্রং অধোমুখং ওঁ পিতৃভ্যঃ স্থানমসীত্যনেন ন্যুব্জং কুর্য্যাৎ (১২) ততো দৈবে উত্তরামুখঃ পাতিত দক্ষিণজানুঃ ওঁ পুরূরবোমাদ্রবসৌ ১৬৬

কৃতো ঽসি ইতি ভাবঃ। ইদন্তু পিতৄণামাবরণম্। আব্রতাস্তত্র তিষ্ঠন্তি পিতরঃ শৌনকো ঽব্রবীদিতি স্মৃতিঃ। (১২) তত উদ্ধৃত্য ঘৃতাক্তমন্নং পৃচ্ছত্যগ্নৌ করিষ্যামি ইতি কা

য়নঃ। গোভিলোঽপি উদ্ধৃত্য ঘৃতাক্তমন্নং পৃচ্ছতি অগ্নৌ করিষ্যামীতি। কুরুষেত্যনুজ্ঞাতঃ। পিণ্ড পিতৃযজ্ঞবৎকৃত্বেতি মন্ত্রো যথা। ওঁ স্বাহা অগ্নয়ে কব্যবাহনায়। ওঁ স্বাহা সোমায় পিতৃমতে। অস্যার্থঃ। স্বাহা ইত্যাহুতিং দত্ত্বা সোমায় পিতৃমতে ইতি মন্ত্রশেষমুদীরয়েৎ। সোমমণ্ডলাকারত্বাৎ। আহুতিরিয়ং

বিশ্বেদেবা এতানি বো গন্ধপুষ্পধূপদীপাচ্ছাদনানি নমঃ। ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। ততঃ পিতৃপক্ষে দক্ষিণামুখঃ প্রাচীনাবীতী পাতিত বামজানুঃ ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নেতানি তে গন্ধ-পুষ্পধূপদীপাচ্ছাদনানি ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যুৎসৃজ্য এষ তে গন্ধ এতত্তে পুষ্পং এষ তে ধূপ এষ তে দীপঃ এতত্ত আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। এবং মাতামহপক্ষেঽপি। তত্তৎ দ্রব্যালাভে যবান্দদ্যাৎ। ততো দৈবা-দিক্রমেণ ব্রাহ্মণাগ্রস্থিতং কুশাদিকং সমস্তমেবাপনীয় দৈবে ঐশানীমারভ্য দক্ষিণাবর্ত্তেন জলধারয়া প্রাগগ্রং চতুষ্কোণমণ্ডলং কৃত্বা পিত্র্যে নৈর্ঋতীমারভ্য বামাবর্ত্তেন দক্ষিণাগ্রং চতুষ্কোণমণ্ডলং কৃত্বা এবং মাতামহপক্ষেঽপি। ততো ভোজনপাত্রাণি দৈবাদিক্রমেণ স্থাপয়েৎ। ততঃ সঘৃতমন্নমাদায় ওঁ অগ্নৌ করিষ্যামি ইতি পংক্তিশ্রেষ্ঠং ব্রাহ্মণং পৃচ্ছেৎ। ওঁ কুরুষেত্যুক্তে ওঁ স্বাহেত্যুক্ত্বাং জলে আহুতিং দত্ত্বা ওঁ সোমায় পিতৃমতে ইতি মন্ত্র শেষং সমাপয়েৎ। ওঁ স্বাহেত্যপরাহুতিং দত্ত্বা অগ্নয়ে কব্যবাহনায় (১৩) ইতি মন্ত্রশেষং

সোমায় পিতৃমতে। পিতরো ঽস্য সন্তীতি পিতৃমাংস্তস্মৈ যতঃ সোমঃ পিতৃণাং দেবতা। ওঁ স্বাহেত্যপরাহুতিং দত্ত্বা অগ্নয়ে কব্যবাহনায় ইতি মন্ত্রশেষং সমা-পয়েৎ। অগ্নয়ে কিম্ভূতায় কব্যবাহনায় কব্যং পিতৃণামন্নং তদ্বহতীতি কব্যবাহনস্তস্মৈ। (১৩) ততো হুতশেষং দত্ত্বা পাত্রমালভ্য জপেদিতি কাত্যায়নঃ ওঁ পৃথিবী তে

পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য মুখে ঽমৃতে ঽমৃতং জুহোমি স্বাহা। অস্যার্থঃ। হে অগ্নে করণহোমশেষ তে তব পাত্রমাধারঃ পৃথিবী বিশ্বাধারভূতা দ্যৌরাকাশং পিধানং আব-
রণমাচ্ছাদন মিতি যাবৎ। ত্বামমৃতং হুতশেষং ব্রাহ্মণমুখে জুহোমি। কিম্ভূতে মুখে অমৃতে অনষ্টে অভক্ষ্যভক্ষণাদিভিরপ্যদূষিতে অত্র তে ইতিষু ষষ্ঠ্যর্থপ্রয়োগাদগ্নৌকরণবিশে-
ষণং প্রাপ্যতে প্রকৃতত্বাৎ জুহোমি হোমপ্রদর্শনাৎ স্বাহাপাদোপাদানাৎ অব্যাহৃতং জুহোমীতি দর্শনাৎ। ব্রাহ্মণস্যাগ্নিতুল্যত্বেন তৎপাণৌ হোমঃ প্রযুক্তঃ দেবতাশ্চাত্র পিতরস্তথা

সমাপয়েৎ। এবং দ্বির্হুত্বা বারদ্বয়ং ততো হুতশেষং দৈবপাত্রে বারদ্বয়ং পিতৃপাত্রে বারত্রয়ং মাতামহাদিপাত্রে চ বারত্রয়ং দত্ত্বা
পিণ্ডার্থং কিঞ্চিৎ স্থাপয়েৎ। ততো দৈবে ঽনুত্তানহস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য মুখে
ঽমৃতে ঽমৃতং জুহোমি স্বাহেতি (১৪) পঠেৎ। পিত্র্যে উত্তানহস্তাভ্যাং ধৃত্বা ওঁ পৃথিবী তে পাত্রমিতি পঠনীয়ং
এবং মাতামহপাত্রে চ। ততো দৈবাদিক্রমেণান্নাদিকং পাত্রান্তরিতহস্তাভ্যাং পত্নী স্বয়ম্বা পরিবেশয়েৎ। উপকরণঞ্চ পাত্রান্তরে
কৃত্বা ভূমৌ স্থাপয়েৎ। পাত্রান্তরাসত্ত্বে ভোজনপাত্রেপি দদ্যাৎ। ন তু পাত্রান্তরে কৃত্বা পাত্রোপরি স্থাপয়েৎ। নত্বেক
হস্তেন পরিবেশয়েৎ। সীসকায়পাষাণাষ্টাঙ্গুলন্যূন ভগ্ন মৃণ্ময় পাত্রাণি বর্জ্জয়েৎ। ভগ্নমপি তাম্রাদিপাত্রং গ্রাহ্যং। রজতপাত্রং স্বল্প-
মপিগ্রাহ্যং। কুষ্মাণ্ডালাবুবার্ত্তাকীপালঙ্কীরাজিকা দ্বিঃস্বিন্নাদিকং বর্জ্জয়েৎ। সৈকব্যঞ্জনবৎ কুর্য্যাৎ। এবমন্নং পরিবেশ্য দৈবাদি ২৬৮

চাপস্তম্বঃ পিতরোঽত্র দেবতা ব্রাহ্মণশ্চাহবনীয়ার্থে ইত্যাদিনা ব্রাহ্মণস্যাগ্নিতুল্যত্বং পিতৃণাং দেবতাতুল্যত্বং প্রতিপাদিতবানিতি ভাবঃ। (১৫) ততো বৈষ্ণবীমৃচং জপতি অঙ্গুষ্ঠমন্নে অ-
বগাহ্যেতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে। অস্যার্থঃ। বিষ্ণুর্ভগবান্ বিশ্বব্যাপিত্রয়া ইদমন্নং বিচক্রমে আক্রান্তবান্ কিঞ্চ বিষ্ণুরেব
পদমস্মিন্নন্নে নিদধে নিহিতবান্ কেন প্রকারেণ ত্রেধা ত্রি-প্রকারম্। কুত্র কুত্র পৃথিব্যাং আকাশে স্বর্গে চ অস্য বিষ্ণোঃ পদং যতো গতং অতঃ পাংশুলে পাংশুযুক্তে ভূদেশে

সমূঢ়ং সমূলং সমাক্ নিবিষ্টং তদয়ং বাক্যার্থঃ। বিষ্ণুর্ভগবান্ ত্রিবিক্রমরূপেণ ঊর্দ্ধমধ্যাধোব্যাপ্তস্তস্য পদং বিশেষতঃ পৃথিব্যাং নিবিষ্টং স বিষ্ণুরিদমন্নমাক্রান্তবান্ অতো রাক্ষসাদয়োঽত্রাপসরন্ত্বিত্যর্থঃ। (১৫) ততস্তিলান্ বিকীর্য্য অসুরাগ্নিরম্যতীতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ অপহতাসুরা রক্ষাংসি বেদিষদঃ। অস্যার্থঃ। অস্মিন্ শ্রাদ্ধার্থমুপকল্পিতে অন্নে হে অসুরা অপহত অপগচ্ছত দূরীভবত ইত্যর্থঃ। কিন্তু তাস্তে বেদিষদঃ বেদ্যাং সীদন্তি তিষ্ঠন্তীতি শ্রাদ্ধার্থপরিষ্কৃতায়াং ভূমৌ যে বিঘ্নার্থমাগচ্ছন্তস্তে যূয়ং নিরস্তা ভবতেতি বাক্যার্থঃ। যজুর্ব্বেদে তু অপহতা অসুরা রক্ষাংসি ইতিপাঠঃ তত্রেয়ং ব্যাখ্যা। যে শ্রাদ্ধবিঘ্নকারিণোঽত্র শ্রাদ্ধার্থমুপ-

ক্রমেণ বামহস্তেন পাত্রং ধৃত্বা সর্ব্বত্র সজলং কৃত্বা দৈবে ওঁ বিষ্ণো হব্যমিদং রক্ষস্ব পিত্র্যে ওঁ কব্যমিদং রক্ষস্ব ইতি পঠিত্বা ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে ইতি মন্ত্রং পঠিত্বা ইদমন্নং ইমা আপ ইদং হবি-রিত্যুক্ত্বা অন্নাদাবনধমঙ্গুষ্ঠং ক্ষিপেৎ [ ১৫ ]। ততো দৈবে তূষ্ণীং যবান্ বিকীর্য্য পিত্র্যে ওঁ অপহতাসুরা রক্ষাংসি বেদিষদঃ (১৬) ইতি মন্ত্রং পঠিত্বা তিলান্ বিকীর্য্য দৈবাদিক্রমেণ ব্রাহ্মণেভ্যো জলং দদ্যাৎ। অন্নে মধু দত্ত্বা তদভাবে গুড়ন্দত্ত্বা সপ্রণবব্যাহৃতিকাং গায়ত্রীং মধুবাতা ঋতায়তে মধুক্ষরন্তু সিন্ধবঃ। মাধ্বীর্নঃ সন্ত্বোষধীর্মধুনক্তমুতোষসো। মধুমৎপার্থিবং রজঃ মধু-দ্যৌরস্তু নঃ পিতা মধুমান্নোবনস্পতির্মধুমাংঅস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ ওঁ মধু মধু মধ্বিতি চ জপেৎ (১৭)। ততো 

কল্পিতে ঽন্নে যে বিঘ্নকারিণ অসুরাস্তে অপহতা অপসারিতা দূরীভূতা ইত্যর্থঃ। (১৬) ততো ওঁ মধুবাতেতি মন্ত্রিতং দদ্যাদিতি কাত্যায়নঃ। মন্ত্রস্তু (১৭) ওঁ মধুবাতা ঋতা-য়তে মধু ক্ষরন্ত সিন্ধবঃ ওঁ মাধ্বীর্নঃ সন্ত্বোষধীর্মধু নক্তমুতোষসো মধুমৎ পার্থিবং রজঃ ওঁ মধু দ্যৌরস্তু নঃ পিতা মধুমান্নো বনস্পতিমধুমাংঅস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ। অস্যার্থঃ। মধুদানেন তৃপ্তাঃ পিতরো ঽভিলপন্তি বাতা একোনপঞ্চাশদ্ভেদভিন্না মধু ঋতায়তে মধু বহন্তু মধুদা ভবন্তু। তথা সিন্ধবো নদ্যঃ মধুক্ষরন্তু স্রবন্তু। তথা নোঽস্মাকং ওষধীরোষধ্যো ধান্যাদয়ো মাধ্বীঃ সন্তু মধুফলা ভবন্তু ইত্যর্থঃ। তথা নক্তং রাত্রয়ো মধুরূপা ভবন্তু॥ তথা উষসঃ কালবিশেষাঃ মধুযুক্তা ভবন্তু। তথা পার্থিবং রজো ধূলয়ঃ

পৃথিবীসম্বন্ধীনি রজাংসি মধুমন্তি ভবন্তু। তথা দ্যৌরাকাশং মধু অস্তু অধিষ্ঠানরূপেণ মধুময়ং ভবতু। ক্বচিৎ দ্যৌঃ স্বর্গঃ পিতেব সর্ব্বস্যাধিগম্যত্বাদিতি পিতৃপদং বিশেষণং কৃতম্। তথা নো ঽস্মাকং পিতা মধুমানস্তু ভবতু। তথা নোঽস্মাকং বনস্পতিরুদ্যানতরবো। তথা সূর্য্যো জগদেকসাক্ষী মধুময়ো ভবতু পূর্ব্ববদর্থসঙ্গতত্বাং

দৈবে উত্তরামুখঃ অনুত্তান বামহস্তেনান্নপাত্রং ধৃত্বা ওঁ পুরূরবো মাদ্রবসৌ বিশ্বদেবা এতদ্বো ঽন্নং সোপকরণং নমঃ। ইত্যুৎসৃজেৎ। তত ইদমন্নং ইমা আপ ইদং হবি এতানি উপকরণানি যথাসুখং বাগ্যতো সদেতামিতি বদেৎ। ততঃ পিতৃপক্ষে দক্ষিণামুখঃ প্রাচীনাবীতী পাতিতবামজানুঃ উত্তানবামহস্তেনান্নপাত্রং ধৃত্বা অন্নং প্রোক্ষ্য ওঁ ইদং বিষ্ণুরিত্যাদি জপিত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নেতত্তে ঽন্নং সোপকরণং ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যুৎসৃজেৎ। ততঃ ওঁ ইদমন্নং ইমা আপঃ ইদং হবি এতান্যুপকরণানি ওঁ যথাসুখং বাগ্যতঃ স্বদত ইতি বদেৎ। এবং মাতামহপক্ষেঽপি। ততঃ প্রত্যেকং জলগণ্ডূষং দদ্যাৎ। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা মধুবাতেতি জপেৎ। ততঃ ওঁ অন্নহীনং ক্রিয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। তৎসর্ব্বমচ্ছিদ্রমস্তু ইতি কৃতাঞ্জলিঃ পঠিত্বা শ্রব্যং পঠেৎ। তদ্যথা সপ্রণবব্যাহৃতিকাং গায়ত্রীং মধুবাতেতি পঠিত্বা ওঁ যজ্ঞেশ্বরো হব্য সমস্ত কব্য ভোক্তা ব্যয়াত্মা হরিরীশ্বরো ঽত্র। তৎ সন্নিধানাদপযান্তু সদ্যো রক্ষাংস্যশে- ২৭০

অন্তেরাদিলোপঃ। তথা নোঽস্মাকং গাবো মাধ্বীঃ মধুক্ষীরিণ্যো ভবন্তু ইত্যাশংসাবাক্যার্থঃ। ঋতায়ত ইতি ঋতশব্দাদায়প্রত্যয়ে তিঙাং তিঙিতি বহু বচনে একবচনং মাধ্বীরিতি বিভক্তির্ব্যত্যয়ে প্রথমায়াং দ্বিতীয়া এবমোষধীরিত্যত্রাপি। উষসশ্ছান্দসত্বান্ন নুনাগমঃ (১৮) মধুমাংস্তিতি দীর্ঘাদচি সমানপদে ইতি সুত্বং অতো-

ঽচি নিত্যমনুনাসিকঃ পূর্ব্ববদনুষঙ্গত্বং। যদ্বা অন্তেরাদি লোপশ্ছান্দসত্বং ততঃ তৃপ্তিং জ্বাস্নান্নং বিকীরেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু পৌরাণিক এব। ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিং। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি তত্তৃপ্তয়ে ঽন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। মম কুলে বংশে যে জীবাঃ প্রাণিনো ঽগ্নিদগ্ধা লৌকিকাগ্নিনা যেন কেনাপি দগ্ধা এব যান্যসুরাশ্চ সর্ব্বে। ওঁ যোগীশ্বরং যাজ্ঞবল্ক্যং সংপূজ্য মুনয়ো ঽব্রুবন্। বর্ণাশ্রমেতরাণান্নো ব্রূহি ধর্ম্মানশেষতঃ। ওঁ মন্বত্রি বিষ্ণুহারীতযাজ্ঞবল্ক্যোশনো ঽঙ্গিরাঃ। যমাপস্তম্বসম্বর্ত্তাঃ কাত্যায়নবৃহস্পতীঃ। পরাশরব্যাসশঙ্খলিখিতা দক্ষগৌতমৌ। শতাতপো বশিষ্ঠশ্চ ধর্ম্মশাস্ত্রপ্রযোজকাঃ। ইতি যাজ্ঞবল্ক্যোক্ত শ্লোকত্রয়ং পঠিত্বা ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততম্। ওঁ দুর্য্যোধনো মন্যুময়ো মহাদ্রুমঃ স্কন্ধঃ কর্ণঃ শকুনিস্তস্য শাখা দুঃশাসনঃ পুষ্পফলে সমৃদ্ধে মূলং রাজা ধৃত- রাষ্ট্রো মনীষী। ওঁ যুধিষ্ঠিরো ধর্ম্মময়ো মহাদ্রুমঃ স্কন্ধোঽর্জুনো ভীমসেনো ঽস্য শাখা মাদ্রীসুতৌ পুষ্পফলে সমৃদ্ধে মূলং কৃষ্ণো ২৭। ব্রহ্ম চ ব্রাহ্মণাশ্চ। ওঁ সপ্ত ব্যাধা দশার্ণেষু মৃগাঃ কালঞ্জরে গিরৌ চক্রবাকাঃ শরদ্বীপে হংসাঃ সরসি মানসে। তে ঽপি জাতাঃ কুরুক্ষেত্রে ব্রাহ্মণা বেদপারগাঃ প্রস্থিতা দূরমধ্বানং যূয়ং তেভ্যো ঽবসীদত ইতি জপেৎ। ততো দক্ষিণাগ্রান্ কুশানাস্তীর্য্য সতিল জলেন সংপ্রোক্ষ্য সর্ব্বপ্রকারমন্নমুদ্ধৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম ভূমৌ দত্তেন তৃপ্যন্তু পিণ্ডোদকভাজো ন ভূতাঃ তথা যে দুর্ভিক্ষমরণেঽদগ্ধা দাহমেব ন লভন্তঃ তে জীবা মামকা মদ্দত্তেন বিকিরণান্নেন তৃপ্তন্তু তৃপ্তাঃ সন্তঃ পরাং গতিং উৎকৃষ্ট স্থানং প্রয়ান্তু গচ্ছন্তু। তথা যেষাং জীবানাং মাতৃপিতৃপ্রভৃতয়ো বান্ধবা ন বিদ্যন্তে শ্রাদ্ধদায়িনস্তেষামপি তৃপ্তয়ে ভুবি ভূমৌ অন্নং দত্তং ময়েতি শেষঃ। তেনান্নেন তৃপ্তাঃ সন্তঃ সুখায় লোকায় স্বর্গাখ্যায় প্রয়ান্তু গচ্ছন্তু। গত্যর্থকর্ম্মণীতি কর্ম্মণি চতুর্থী। (১৯) বিকিরণান্তরং ভূমৌ রেখাং কুর্য্যাৎ। ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ নিহন্মি

সর্ব্বং যদমেধ্যবস্তুবেদ্ধতাশ্চ সর্ব্বে হস্তুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসঙ্ঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। অস্যার্থঃ। অস্মিন্ প্রকৃতে কর্ম্মণি যদমেধ্যবৎ যদপ্যবিত্রভূতং অবিহিতাচরণাচারাদিরূপেণ যদসাঙ্গরূপ তন্নিহন্মি নিরস্যামি তথা যদত্রাস্তুরদানবাদয়ো বিঘ্নকারিণস্তেঽপি হতা নিরস্তাঃ সর্ব্ব এব অতস্তেষামত্রানবসর

তৃপ্তা যান্তু পরাং গতিং। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নবান্নসিদ্ধির্নতথান্নমস্তি। তত্তৃপ্তয়ে হন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। (১৮) ইতি মন্ত্রাভ্যাং তত্তুক্তফলমুদ্দিশ্য কুশোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণশ্রবণং স্পৃষ্ট্বা হরিং স্মৃত্বা ব্রাহ্মণেভ্যঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গায়ত্রীং মধুবাতেতি চ জপ্ত্বা ওঁ শেষমন্নমস্তি ক্ব দেয়ং ইতি পৃচ্ছেৎ। ইষ্টেভ্যো দীয়তা মিতি প্রতিবচনং। ওঁ পিণ্ডদানমহং করিষ্যে ইতি পৃচ্ছেৎ। ওঁ কুরুষেতি তৈরুক্তে ব্রাহ্মণ সংমুখে ওঁ নিহন্মি সর্ব্বং যদমেধ্যবস্তুবেদ্ধতাশ্চ সর্ব্বে হস্তুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসঙ্ঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে (১৯)। ইত্যনেন নৈর্ঋতীমারভ্য বামা- বর্ত্তেন চতুষ্কোণমণ্ডলং কৃত্বা তৎ পূর্ব্বদিশি মাতামহপক্ষেঽপি তথাবিধমপরমণ্ডলং কৃত্বা প্রাদেশমাত্রং সাগ্রকুশপত্রদ্বয়ং বামহস্তা- দক্ষিণহস্তেন গৃহীত্বা বামহস্তান্বারব্ধদক্ষিণহস্তেন দক্ষিণাগ্রাং রেখাং মধ্যস্থানে কুর্য্যাৎ ওঁ অপহতাসুরা রক্ষাংসি বেদিষদ। ওঁ নিহন্মি সর্ব্বমিতি মন্ত্রাভ্যাং তদ্দর্ভদ্বয় মুত্তরস্যাং দিশি ক্ষিপেৎ। ততো রেখোপরি সমূলান্ সাগ্রান্ কুশানাস্তীর্য্য ওঁ দেবতাভ্যঃ পিতৃ- ভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি ইতি ত্রিঃ পঠেৎ। ততঃ ওঁ এত পিতরঃ সোম্যাসো গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দত্তাস্মভ্যং দ্রবিণেহ ভদ্রং রৈঞ্চ নঃ সর্ব্ববীরং নিযচ্ছত ইতি মন্ত্রেণ তিলাংশ্চাস্তীর্ণ কুশেষু বিকি-

ইত্যভিপ্রায়ঃ। (২০) রেখোপরি কুশনাস্তীর্য্যাবনেজয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নবনেনিক্ষ্ব যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ

তে স্বধেতি গোভিলোক্তঃ। অস্যার্থঃ। হে পিতস্ত্বমবনেনিক্ষ্ব মদ্দত্তেন তোয়েন শুদ্ধো ভব। ন কেবলং ত্বমেব কিঞ্চান্যে ঽপি যে ঽত্র শ্রাদ্ধকর্ম্মণি ত্বামনু তব



রেৎ। ততঃ সতিলং পুষ্পং গৃহীত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নবনেনিক্ষ্ব ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধা [ ২০ ] ইতি। এবং জলস্পর্শপূর্ব্বকং পিতামহাদিপঞ্চভ্যো মূলমধ্যাগ্রক্রমেণাস্তীর্ণকুশেষু দদ্যাৎ। ততঃ অগ্নৌ করণশেষেণ সর্ব্বাবশিষ্টান্নেন পিণ্ডান্ বিল্বপ্রমাণকান্ নির্ম্মায় বামহস্তগৃহীতপাত্রাদ্দক্ষিণহস্তেন পিণ্ডং গৃহীত্বা ওঁ মধুবাতা ঋতায়তে মধু ক্ষরন্তু সিন্ধবঃ মাধ্বীর্নঃ সন্ত্বোষধীর্মধুনক্তমুতোষসো মধুমৎ পার্থিবং রজঃ। মধু দ্যৌরস্তু নঃ ২৭০
পিতা ওঁ মধুমান্নো বনস্পতি র্মধুমাংস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ। ওঁ মধু মধু মধু। ওঁ অক্ষন্নমীমদন্ত হ্যব প্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্র তে হরী। [ ২১ ] ইতি পঠিত্বা প্রথমাস্তীর্ণকুশমূলে ওঁ অমুক

পশ্চাদ্বোক্তারস্তথা যাংশ্চ ত্বমনু যেষাং ত্বং পশ্চাদ্বোক্তাসি। তস্মৈ তবানুযায়িনে তুভ্যঞ্চ। তস্মৈ ইতি বহুবচনে একবচনং তেভ্য ইত্যর্থঃ। (২১) অবনেজনে

পিণ্ডান্নিনয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ অক্ষন্নমীমদন্ত হ্যব প্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান্ বিষ্ঠয়া মতীয়ো যান্বিন্দ্র তে হরী। অস্যার্থঃ। হে হরে হে ইন্দ্র যান্ বিপ্রান্ যে শ্রাদ্ধভোক্তারো বিপ্রা মদ্দত্তেনান্নপানীয়েনামীমদন্ত মুদমতার্থং প্রাপ্যাহর্ষযুক্তা বভুবুস্তথা অস্তোষত যে তুষ্টা ভূতাস্তথা অক্ষন্ যে সংহতান্ একীভূতান্ বিপ্রান্ অব পালয়। হি যস্মাৎ বিপ্রাঃ তে তব প্রিয়া বল্লভাঃ ব্রাহ্মণো মামকী তনুরিতি ত্বয়ৈবোক্তত্বাৎ তত্র তে বিপ্রাস্তবৈব আশ্রয়ান্ন অধূষত নাবকম্পন্ত কিম্ভূতাস্তে বিপ্রাঃ। স্বভানবঃ সুপ্রকাশশীলাঃ স্বপ্রদীপকা ইতি যাবৎ। উ অবধারণে স্থ বিতর্কে। বিপ্রাঃ পুনঃ কীদৃশা বিষ্ঠয়া মাতীয়া উর্দ্ধগামিন্যা মত্যা বিশিষ্টা বিষ্ঠেতি বি শব্দো হন্তরীক্ষে হপি।

গোত্র পিতরমুক দেবশর্ম্মন্নেব তে পিণ্ডঃ ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধা। ইত্যবনেজনস্থানে দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শপূর্ব্বকং পিতামহাদীনাং পঞ্চ পিণ্ডান্ তথৈব দদ্যাৎ। ততঃ পিণ্ডান্তিকে পিণ্ডশেষং বিকীরেৎ। হস্তলেপঞ্চ কুশমূলেন ওঁ লেপভুজঃ পিতরঃ প্রীয়ন্তাং ইত্যনেন নিম্নয্যাচম্য হরিং স্মৃত্বা পিণ্ডপাত্রং প্রক্ষাল্য তৎপাত্রং বামহস্তাদক্ষিণহস্তেন গৃহীত্বা প্রক্ষালন জলেন ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নবনেনিক্ষ্ব ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যবনেজয়েৎ। এবং পিতামহাদিপঞ্চসু। ততঃ ওঁ অত্র পিতরো মাদয়ধ্বং ওঁ যথাভাগমাবৃষায়ধ্বং ইতি জপেৎ [ ২২ ]। 

বো তিষ্ঠতি গচ্ছতি বা বিষ্ঠা ছান্দসত্বাৎ যত্বম্। অতস্তর্করামি সুপ্রকাশবত ইতি ছান্দসত্বাৎ। মত্যা ইত্যর্থে মতীয়া যকারাগমঃ ছান্দসত্বাৎ। হরীতি সম্বোধনপদং সম্বুদ্ধাবীদিতি ঈকারঃ। ইন্দ্র ইতি হরিবিশেষণং পরমেশ্বরত্বাৎ অবিদ্যাং কার্য্যে হরতীতি হরিরিতি অন্বয়াৎ। যানিতি বিভক্তিব্যত্যয়েন প্রথমায়াং দ্বিতীয়া। পূর্ব্ববৎ তেনায়মর্থঃ। যে বিপ্রা অত্র কর্ম্মণি ভোক্তারস্তান্ বিপ্রান্ অব রক্ষ ইত্যর্থঃ। অক্ষন্নিতি ছান্দসত্বাদড়াগমবাধঃ। মতীয়া উ যান্ স্থ ইত্যর্থে মতীয়ো যান্বিন্দ্র ইতি ব্যুৎপত্তিঃ। যস্তদোরভিসম্বন্ধনিয়মাৎ যচ্ছব্দপ্রয়োগে তানিত্যধ্যাহার্য্যম্। (২২) পিণ্ডদানানন্তরং অত্র পিতর ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। অত্র পিতরো মাদয়ধ্বং

যথাভাগমাবৃষায়ধ্বম্। অস্যার্থঃ। হে পিতরঃ অত্র পিণ্ডে মাদয়ধ্বং হর্ষযুক্তা ভবত। ন কেবলং মাদয়ধ্বং কিন্তু যথাভাগং স্বং স্ব[illegible]ভাগং শ্রাদ্ধোপযুক্তং প্রাপ্য আবৃষায়ধ্বং বৃষা ইব বলিনো ভবত। অত্রেবামীমদন্তঃ পিতরো যথাভাগমাবৃষায়িষত। পিতরোঽমীমদন্তঃ মোদং প্রাপ্তা মদ্দত্তেন পিণ্ডেন হর্ষযুক্তা ভূতা ইত্যযথেতি ব্যাখ্যাতম্। বৃষশব্দাৎ ক্যঙ্ লোট্। পিণ্ডপূজনন্তর বসন্তায় নমস্তুভ্যমিতি স্মার্ত্তাঃ। (২৩) ততঃ পরাবৃত্য নমো ব ইতি জপেদিতি কাত্যায়নঃ।

ততঃ আচম্য বামাবর্ত্তেনোদঙ্মুখো ভূত্বা শ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ সর্ব্বান্ পিতৄন্ ভাস্বরমূর্ত্তিকান্ ধ্যায়ন্ ওঁ অমীমদন্তঃ পিতরো যথাভাগমাবৃষায়ধ্বং ইতি জপেৎ। ততঃ শ্বাসং ত্যজেৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ নমো বঃ পিতরঃ পিতরো নমো বঃ। ওঁ গৃহান্নঃ পিতরো দত্ত ইতি গৃহিণীং পশ্যেৎ। ওঁ সদো বঃ পিতরো দেষ্ম (২৩) ইতি পিণ্ডং পশ্যেৎ। ততো নবমনবধৌ শুক্লবস্ত্রদশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বঃ পিতরো বাস ইতি পঠিত্বা ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতত্তে বাসঃ ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইতি বামহস্তান্বারব্ধদক্ষিণহস্তেন পিতৃপিণ্ডে দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শপূর্ব্বকং পিতামহাদিপঞ্চসু পিণ্ডেষু সূত্রতন্তূন্ প্রত্যেকং মন্ত্রপূর্ব্বকং দদ্যাৎ। ততঃ পিণ্ডান্ গন্ধাদিনা তুষ্টানেব পিত্রাদীন্নুদ্দিশ্য তুষ্ণীং সংপূজয়েৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ। মাসসংবৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ (২৪)

মন্ত্রস্য। ওঁ নমো বঃ পিতরো পিতরো নমো বঃ। ওঁ গৃহান্নঃ পিতরো দত্ত ওঁ সদো বঃ পিতরো দেষ্ম। অস্যার্থঃ। হে পিতরঃ বো যুষ্মভ্যং নমোঽস্তু ভক্তিশ্রদ্ধাতিশয়েন পুনঃ পুনর্নমস্কারো হর্ষিতত্বাৎ পুনরুক্তিঃ। নমস্কারাদিনা প্রীতাঃ সন্তঃ পিতরো নো হস্মভ্যং গৃহানস্মৎকুলদারান্ অত্র চ গৃহিণী গৃহমুচ্যতে ইতি গৃহিণীপার্থনম্। দত্ত প্রযচ্ছত। হে যং বো যুষ্মভ্যং পুত্রোত্তাপত্তিরূপেণ সদঃ সভাস্থানং দেষ্মঃ দদামঃ ছান্দসত্বাৎ বিসর্গস্যবিকরণলোপঃ দীর্ঘাভাবো গুণশ্চোপধায়াঃ। (২৫) অনন্তর সবোল

পরাবৃত্য বসন্তায় ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। হেমন্তায় নমস্তুভ্যং
-নমস্তে শিশিরায় চ। মাসসংবৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ। অস্যার্থঃ বসন্তো জগদাহ্লাদক ঋতুবিশেষঃ। তং প্রত্যক্ষীকৃত্য স্তৌমি তুভ্যং নমঃ। তথা গ্রীষ্মঃ
শোষক এব ঋতুস্তস্মৈ নমঃ। তথা বর্ষাঃ সর্ব্বজনানাং শস্যোৎপাদকত্বেন স্থিতিকারক ঋতুবিশেষস্তাভ্যো নমঃ। তথা শরদপি মনোহারী ঋতুস্তস্মৈ নমঃ। তথা হেমন্তঃ
শৈত্যসম্বন্ধিহেতুভূত সুখাবহ ঋতুস্তস্মৈ নমঃ। তথা শিশিরোঽপি মনোঽনুকূলসুখসম্পাদক ঋতুস্তস্মৈ নমঃ। তথা দ্বাদশমাসাঃ সম্বৎসরাদিবর্ষাশ্চ স্বীয় স্বীয় প্রয়োজনকত্বেন
নমস্যাস্তেভ্যো নম ইতি শ্রাদ্ধকর্ত্তুঃ পিতৃণাং ঋতুবিহিতশ্রাদ্ধদানেনাতিশয় প্রীতিজনকত্বাৎ ঋতুভ্যো নমস্কারদ্বারেণানতিরিত্যর্থঃ। যজুর্ব্বেদিনামপি ষড়ঞ্জলিদানং
প্রসঙ্গাল্লিখিতম্। ওঁ নমো বঃ পিতরঃ শুষ্মায়। নমো বঃ পিতরস্তপসে। নমো বঃ পিতরো যজ্জীবং তস্মৈ। নমো বঃ পিতরো রসায়। নমো বঃ পিতরো ঘোরায় মন্যবে
ও স্বধায়ৈ পিতরো নমঃ। এষাময়মর্থঃ। হে পিতরো বো যুষ্মভ্যং নমঃ শুষ্মায় শোষণ কারিণে গ্রীষ্মায়েতি যাবৎ। শুষ শোষণে শুষের্ম ইতি ম প্রত্যয়েন সিদ্ধং। ২৭২

ইত্যনেন ষড়্ঋতুরূপত্বেন পিতৄন্নমস্কুর্য্যাৎ। ততঃ ওঁ সুসুপ্রোক্ষিতমস্ত্বিতি ব্রাহ্মণাগ্রভূমিমাসিঞ্চেৎ॥ ততঃ ওঁ অস্ত্বিতি প্রতিবচ-

তা হে পিতরো বো যুষ্মভ্যং নমঃ। তপসে শিশিরায় ঋতবে চ। তপা ইতি মাঘমাসস্য নাম। তপা মাঘেঽথ ফাল্গুনে ইত্যমরঃ। তপধূপ সন্তাপে শিশিরেণ
-লোকাংস্তাপয়তি তাপয়তে রসুন্ ছান্দসত্বাৎ হ্রস্ব ইলোপশ্চ। হে পিতরো বো যুষ্মভ্যং নমঃ। যজ্জীবং জলং তস্মৈ নমঃ। জীবনত্বেন
জলমুচ্যতে জলেন বর্ষাঃ সংবুধ্যন্তে অতো বর্ষাভ্যো নমঃ। তথা হে পিতরো বো যুষ্মভ্যং নমঃ। রসায় নমঃ। রসঃ পুষ্পরসঃ। বসন্তায় নমঃ।
তদ্যোগাত্তদ্বত্যুপদেশ ইতি রসশব্দেন বসন্ত উচ্যতে। তথা হে পিতরো বো নমঃ ঘোরায় মন্যবে নমঃ হেমন্তায় নম ইত্যর্থঃ। হেমন্তঃ খলু শীতলপ্রভুত্বাৎ প্রাণিনাং
ভয়হেতুর্ভবতি অতো ঘোরঃ। মনুশ্চ দুঃখজনকত্বাৎ মন্যবে ক্রুদ্ধায় যথা। কশ্চিৎ দুঃখং মনো দুঃখং জনয়তি তথা অয়মপি শীতলজনকত্বাৎ দুঃখমুৎপাদয়তি। তথা হে
পিতরো নমঃ স্বধায়ৈ শরদে নমঃ তথা চ শ্রুতিঃ। স্বধা বৈ পিতৃণামন্নমিতি তদেতৈঃ ষড়্ভিঃ ঋতুনমস্কারৈঃ পিতরস্তুষ্টা ভবন্তি ঋতবশ্চেতি তাৎপর্য্যম্। (২৫)

অথ পিণ্ডাগ্রভূমিমাসিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ সুস্বপ্রোক্ষিমস্তু। অস্যার্থঃ। ইদং পিণ্ডমিমং পস্থানং সুস্বপ্রোক্ষিতং অতিশয়েন প্রোক্ষিতং ভবতু ইত্যাশংসা (২৬) তথা শিবা আপঃ সন্তু। অস্যার্থঃ। এতা আপঃ শ্রাদ্ধকর্ম্মণি নিযুক্তাঃ শিবাঃ কল্যাণপ্রদাঃ সন্তু ইত্যাশংসা। (২৭) তথা সৌমনস্যমস্তু। অস্যার্থঃ। সুমনসো ভাবঃ সৌমনস্যং যদত্র শ্রাদ্ধে দত্তং পুষ্পং সৌমনস্যং সুমনসঃ প্রসাদজনকং ভবতু। (২৮) তথা অক্ষতঞ্চারিষ্টমস্তু। অস্যার্থঃ। অক্ষতং

নম্। ওঁ ততো দৈবপূর্ব্বকং ওঁ শিবা আপঃ সন্তু (২৬) ইতি ব্রাহ্মণে জলং দদ্যাৎ। ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ সৌমনস্য-মস্তু [২৭] ইতি পুষ্পং দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ অক্ষতঞ্চারিষ্টমস্তু [২৮] ইতি দূর্ব্বাক্ষতং দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ততস্তিলাজ্যমধুযুক্তং জলং গৃহীত্বা ওঁ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ কৃতে ঽস্মিন্ শ্রাদ্ধে সর্ব্বং দত্তমিদ-মন্নপানাদিকমক্ষয্যমস্ত্বিতি ব্রাহ্মণে পিণ্ডোপরি দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। এবমেব পিতামহাদিপঞ্চভ্যো দদ্যাৎ। ওঁ অঘোরাঃ পিতরঃ সন্তু ইতি বদেৎ [২৯] ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ গোত্রন্নো বর্দ্ধতামিতি বদেৎ। [৩০] ওঁ বর্দ্ধতামিতি প্রতিবচনম্। ততঃ সপবিত্র কুশান্ পিণ্ডানমুপর্য্যাস্তীর্য্য ওঁ স্বধাং বাচয়িষ্যে [৩১] ইতি প্রার্থনম্। ওঁ বাচ্যতামিত্যনুজ্ঞাতঃ। 

যবা ইদমক্ষতমরিষ্টং শ্রাদ্ধংবিঘ্নকারিণা নিরাশয়িতুমস্তু ভবতু। (২৯) ততো ঽক্ষয্যদানানন্তরম্। অঘোরা ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। অঘোরাঃ পিতরঃসন্তু। অস্যার্থঃ। মম পিতরঃ পিতৃপিতামহ প্রপিতামহ প্রভৃতয়ঃ অঘোরা অভয়প্রদাঃ সন্তু ভবন্তু। (৩০) গোত্রং নো বর্দ্ধতাম্। তেষাং শ্রাদ্ধদানেনাতিশয় প্রীতিজনকত্বাৎ স্বগোত্রং সন্ততিং পুত্রপৌত্রাদিরূপাং বর্দ্ধতামিত্যাশসাং। (৩১) ততো ঽক্ষয্যানন্তরং পিণ্ডে পবিত্রসম্বন্ধান্ কুশানাস্তীর্য্য পৃচ্ছেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ স্বধাং বাচ

য়িষ্যে ইতি। স্বধা যদন্নং তদ্বাচয়িষ্যে কিন্তুদিতাকাঙ্ক্ষায়াং স্বধোচ্যতামিতি পিতৃণাং স্বধামন্নমুচ্যতাং যদত্র শ্রাদ্ধে দত্তমন্নাদিকং তৎ সর্ব্বমুক্তং ভবতু বিপ্রাক্তং ভন্ত্বিতার্থঃ। এবং পিতামহাদিষু নোহ্বম্‌। প্রত্যেকং বহুবচনমুক্তম্‌। (৩২) তত ঊর্জ্জমিত্যপো নিষিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ ঊর্জ্জং বহন্তীরমৃতং পয়ঃ কীলালং পরিস্রুতং স্বধা স্থ তর্পয়ত মে পিতৄন্‌। অস্যার্থঃ। হে আপো জগৎপ্রাণভূতা যূয়ং স্বধা স্থ নানাবিধমন্নং ভবত। ততস্তেনান্নেন পিতৄন্‌ তর্পয়তেত্যর্থঃ। ইতি প্রার্থনা।

ওঁ পিতৃভ্যঃ স্বধোচ্যতাং ইতি বদেৎ ওঁ অস্তু স্বধা ইতি প্রতিবচনম্‌। ওঁ পিতামহেভ্যঃ স্বধোচ্যতাং ওঁ প্রপিতামহেভ্যঃ স্বধোচ্যতাং ওঁ মাতামহেভ্যঃ স্বধোচ্যতাং ওঁ প্রমাতামহেভ্যঃ স্বধোচ্যতাং ওঁ বৃদ্ধপ্রমাতামহেভ্যঃ স্বধোচ্যতাং। ইতি বদেৎ। ওঁ অস্তু স্বধেতি প্রতিবচনং সর্ব্বত্র। ততঃ সপবিত্রকুশসহিত পিণ্ডোপরি বারিধারয়া ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধা স্থ তর্পয়ত মে পিতৄন্‌ ইতি সিঞ্চেৎ [৩২]। যদি পুত্রার্থিনী পত্নী ঋতুস্নাতা স্যাৎ তদা পিতামহপিণ্ডং ওঁ আধত্ত পিতরো গর্ভং কুমারং পুষ্করস্রজং যথেহ পুরুষঃ স্যাদিতি মন্ত্রেণ তস্যৈ দদ্যাৎ। সা বাগ্‌যতা ভোজনকালে ভক্ষয়েৎ। এবমেব ভট্টনারায়ণঃ। [৩৩] ততো ন্যুব্জীকৃতং পাত্রমুত্তোল্য দক্ষিণাং দদ্যাৎ। যথা পিতৃপক্ষে ২১৮

কিং কুর্ব্বত্যো ঊর্জ্জং পরমান্নরসময়মন্নং ঘৃতং সর্পিঃ পয়ঃ ক্ষীরং কীলালং পক্কমন্নং পরিস্রুতং সুরাং তচ্ছায়ামৃতরূপমেব বহন্ত্যঃ বহন্ত্যঃ প্রাপয়ন্ত্যঃ। যতো যূয়ং নানাবিধমন্নং বহন্ত্যঃ স্বধা ভবত তস্মাৎ মম পিতৄন্‌ তর্পয়ত বহন্তীরিতি বিভক্তিব্যত্যয়ঃ। (৩৩) পুত্রার্থিনী গৃহিণী পিতামহপিণ্ডং ভক্ষয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ আধত্ত

পিতরো গর্ভং কুমারং পুষ্করস্রজং যথেহ পুরুষঃ স্যাৎ। তদর্থং ইহৈব ঋতৌ পুরুষো দেবপিতৃমনুষ্যাণামভীষ্টং পূরয়িত্বা যথা স্যাৎ তথা হে পিতর

ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণো ঽমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণো ঽমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ কৃতৈতৎপার্ব্বণশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি। এবং মাতামহপক্ষে ঽপি। ততো দৈবে। ওঁ অদ্যেত্যাদি পুরূরবোমাদ্রবসোর্বিশ্বেষাং দেবানাং কৃতৈতৎপার্ব্বণশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং তন্মূল্যং বা বিষ্ণুদৈবতং যথা নাম গোত্রায় ব্রাহ্মণায়াহং দদানি ইতি দক্ষিণাং দদ্যাৎ। পর্ব্বেতরত্র পার্ব্বণ বিবিধ শ্রাদ্ধকর্ম্মণ ইতি প্রয়োক্তব্যম্। ততঃ বিশ্বেদেবাঃ প্রীয়ন্তাং ইতি পৃচ্ছেৎ। ওঁ প্রীয়ন্তামিতি প্রতিবচনম্। দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ততো দক্ষিণামুখঃ কৃতাঞ্জলিঃ সুমনাস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ পিতৄন্ বরং যাচেত। ওঁ আশিষো মে প্রদীয়ন্তাং ইতি পৃচ্ছেৎ। ওঁ আশিষঃ প্রতিগৃহ্যন্তাং ইত্যুক্তে ওঁ দাতারো নো ঽভিবর্দ্ধন্তাং বেদা সন্ততিরেব চ। শ্রদ্ধা চ নো মাব্যগমদ্বহু দেয়ঞ্চ নো ঽস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি যাচিতারশ্চ নঃ সন্তু মা চ যাচি স্ম কাঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং দাতা শতং জীবতু। যেভ্যঃ সংকল্পিতা দ্বিজাস্তেষামক্ষয়া তৃপ্তিরস্তু। এতাঃ সত্যাশিষঃ সন্তু পিতৃবর প্রসাদো ঽস্তু। ইতি প্রার্থয়েৎ। ওঁ সন্ত্বিতি প্রতিবচনম্। ততঃ ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি ইতি ত্রিঃ পঠেৎ। ওঁ বাজে বাজে ঽবত বাজিনো নো ধনেষু বিপ্রা অমৃতা ঋতজ্ঞা অস্য মধ্বঃ পিবত মাদ- ২১২

মম পত্র্যাঃ গর্ভমাধত্ত মাদয়ত। কিন্তু তং গর্ভং কুমারং পুমাংসং পুনঃ কিন্তু তং পুষ্করস্রজং পুষ্করস্য পদ্মস্য মালা যয়োস্তৌ পুষ্করস্রজৌ অশ্বিনকুমারৌ তাভি-

পুষ্করস্রজঃ নীরুজং দীর্ঘায়ুষং সুরূপঞ্চেত্যর্থঃ। পুষ্পমালালংকৃতম্। (৩৪) বাজে বাজে ইতি বিসৃজ্য অস্থব্রজেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বাজে বাজে ঽবত বাজিনো নো ধনেষু বিপ্রা অমৃতা ঋতজ্ঞা অস্য মধ্বঃ পিবত মাদয়ধ্বং তৃপ্তা যাত পথিভির্দ্দেবযানৈঃ। অস্যার্থঃ। বাজমন্নং তদস্যাস্তীতি বাজী। তথাচাভিধানকাণ্ডম্। বাজং স্যাদন্নপক্ষয়োরিতি। হে বাজিনঃ পিতরঃ তদিদং শ্রাদ্ধদত্তমন্নং কৃতমকৃতং বা যূয়ং অবত রক্ষত অসুরৈর্যথা ন লুপ্যতে তথা কুরুত। বাজে বাজে অন্নে অন্নে যদা যদৈব পরিকল্পিতং স্যাদন্নং তদা তদৈব অবত রক্ষত ইত্যর্থঃ। ন কেবলমন্নরক্ষিতারো যূয়ং কিঞ্চ ধনেষ্বপি ধনেষু রক্ষাং কুরুত। কিম্ভূতা যূয়ং বিপ্রা বিপ্রমূর্ত্তিধরাঃ

য়ধ্বং তৃপ্তা যাত পথিভির্দ্দেবযানৈরিতি কুশত্রয়েণ ব্রাহ্মণস্থান্ পিতৄন্ বিসৃজ্য পশ্চাদ্‌ব্রাহ্মণস্থান্দেবান্ উপবীতী বিসর্জ্জয়েৎ। (৩৪) ততঃ ওঁ আ মা বাজস্য প্রসবো জগম্যা দেমে দ্যাবা পৃথিবী বিশ্বরূপে আ মা গন্তুং পিতরা মাতরা যুবমা মা সোমোঽমৃতত্বায় গম্যাদিতি মন্ত্রেণ প্রদক্ষিণবারিধারয়া ব্রাহ্মণান্ বেষ্টয়ন্ প্রণমেৎ (৩৫)। ততঃ পাত্রসমর্পণম্। পিণ্ডান্ গোঽজবি-

বিপ্রদেহস্থা এব পিতরো ভুঞ্জতে যতঃ। পুনঃ কীদৃশাঃ অমৃতাঃ অমরণধর্ম্মাঃ প্রাপ্তপিতৃদেহত্বাৎ। পুনঃ কীদৃশাঃ ঋতজ্ঞাঃ সত্যশালিনঃ। কিঞ্চ এতৎ সম্বন্ধীনি মধূনি মধুবদানন্দযুক্তানি পিবত পীত্বা চ মাদয়ধ্বং হর্ষযুক্তা ভবত হৃষ্টা ভবত ইত্যর্থঃ। কিঞ্চ তৃপ্তাঃ সন্তোঃ যৈঃ পথিভির্দ্দেবা যান্তি তৈঃ পথিভিঃ যূয়ং গচ্ছত। মধ্ব ইতি ছান্দস স্বান্নস্নাগমঃ। (৩৫) ততঃ প্রদক্ষিণীকৃত্য প্রণমেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ আমা রাজস্য প্রসবো জগম্যা দেমে দ্যাবা পৃথিবী বিশ্বরূপে আ মা গন্তুম।